त्री। पुंयोग एवेष्यते। पूतक्रतोः स्त्री पूतक्रतायी। यया पूतक्रतवः क्रीताः पूतक्रतुरेव सा। वृषाकप्यग्निकुसितकुसीदानामु
दात्तः। एषामुदात्त ऐ आदेशः स्यान्ङीप् च। वृषाकपेः स्त्री वृषाकपायी हरविष्णू वृषाकपी इत्यमरः। वृषाकपायी श्रीगौर्यो
रिति च। अग्नायी कुसितायी कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः। मनोरौ वा। मनुशब्दस्यौकारादेशः स्यात्
उदात्तैकारश्च वा तत्संनियोगशिष्टो ङीप् च। मनोः स्त्री मनायी मनावी मनुः। वर्णादनुदात्तात्तोपधात्तो नः। वर्णवाची योऽनु
दात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् स्यात् तकारस्य नकारादेशश्च। एता एनी रोहिता रोहिणी। व
र्णानां तणतिनितान्तानामिति फिट्सूत्रेणाद्युदात्तः। त्रेण्या च न्नालस्येतियद्वा त्रीण्येतानि अस्याः इति बहुव्रीहिः। अनु
दात्तात्किं श्वेता। घृतादीनां चेत्यन्तोदात्तोऽयं। अत इत्येव शितिः स्त्री। पिशङ्गादुपसंख्यानं। पिशङ्गी। असितपलितयोर्न। अ
सिता। छंदसि क्रमेके। असिक्नी पलिक्नी। अवदातशब्दस्तु न वर्णवाची किन्तु विशुद्धवाची तेनावदातेत्येव। अन्यतो ङी
ष्। तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात्प्रातिपदिकात्स्त्रियां ङीष् स्यात्। कल्माषी सारंगी। लघावन्ते द्वयोश्च बह्वषो गुरु
रिति मध्योदात्तावेतौ। अनुदात्तान्तात्किं कृष्णा कपिला। षिद्गौरादिभ्यश्च। षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात्। नर्तकी गौरी अन
ड्ही अनड्वाही पिप्पल्यादयश्च। आकृतिगणोऽयं। सूर्यातिष्यागस्त्यमत्स्यानां य उपधायाः। अगस्त्योपधाया यस्य लोपः
स्यात्सेह। सूर्या यवलवः। मत्स्यङ्यां सूर्यागस्त्ययोश्छे च ङ्यां च। तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यं। मत्सी

मातरिषिच्चेतिषिच्वादेवसिद्धे गौरादिषु मातामहीशब्दपाठादनित्यः षितोङीषं दृष्टा जानपदकुण्डगोणस्थलभाज
नागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु एका
दशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीष् स्यात् जानपदी वृत्तिश्चेत् अन्या तु जानपदी उत्सादित्वादणन्तत्वेन टिड्ढेति ङी
प् । स्वरदोषः कुण्डी अमत्रं चेत् कुण्डान्या कुण्डी दाहे गुरौ स्वरूप इति अवयवत्वात् मृते अमृते जारजः कुण्ड इति मनुष्यजातिव
चनत्वात् जातिलक्षणो ङीष् भवत्येव अमत्रे हि स्त्रीविषयत्वादप्राप्तो ङीष् विधीयते न तु नियम्यते गोणी आवपनं चेत् गोणान्या स्थ
ली अकृत्रिमा चेत् स्थलान्या भाजी श्राणा चेत् भाजान्या नागी स्थूला चेत् नागान्या गजवाची नागशब्दः स्थौल्यगुणयोगादन्य
त्र प्रयुक्त उदाहरणं सर्पवाची तु दैर्घ्यगुणादन्यत्र प्रयुक्तः प्रत्युदाहरणं काली वर्णश्चेत् कालान्या नीली अनाच्छादनं चेत् नी
लान्या नील्या रक्ता शाटीत्यर्थः नील्या अन्वक्तव्य इत्यन्ये अनाच्छादनेऽपि न सर्वत्र किं तु नीलादोषधौ नीली प्राणिनि च नीली गौः सं
ज्ञायां वा नीली नीला कुशी अयोविकारश्चेत् कुशान्या कामुकी मैथुनेच्छा चेत् कामुकान्या कबरी केशानां संनिवेशश्चेत् विशेषः
कबरान्या विचित्रेत्यर्थः शोणात्प्राचां शोणी शोणा वोतो गुणवचनात् उदन्तात् गुणवाचिनो वा ङीष् स्यात् मृद्वी मृदुः उतः किं शुचिः गु
णेति किं आखुः खरुसंयोगोपधान्न खरुः पतिवरा कन्या पाण्डुः बह्वादिभ्यश्च बह्वी बहुः कृदिकारादक्तिनः रात्रिः
रात्री सर्वतोऽक्तिन्नर्थादित्येके शकटिः अक्तिन्निति किं अजननिः क्तिन्नन्तत्वादप्राप्ते विध्यर्थं पद्धतिशब्दो गणे पठ्यते हिमं हति
हतिश्चेति पक्षान्तरं वः पुंयोगादाख्यायां या पुमाख्या पुंयोगात् स्त्रियां वर्त्तते ततो ङीष् स्यात् गोपस्य स्त्री गोपी पालकान्तान्न गोपालि का॰वि॰
का अश्वपालिका सूर्याद्देवतायां चाप् वाच्यः सूर्यस्य स्त्री देवता सूर्या देवतायां किं सूरी कुन्ती मानुषीयं इन्द्रवरुणभव ३०
शर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् एषामानुगागमः स्यात् ङीष् च इन्द्रादीनां बह्वा मातुलाचार्याभ्या

पुंयोग एवेष्यते तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते इतरेषां चतुर्णां तु समं इंद्राणी हिमारण्ययोर्महत्त्वे महद्धिमं हिमानी
अरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्यां यवनानां लिपिर्यवनानी मातुलोपाध्याययोरानुग्वा मातुलानी मातुली उपा
ध्यायानी उपाध्यायी यातु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्य उपाध्यायी उपाध्याया आचार्यादणत्वं च आचार्यस्य स्त्री आचार्या
नी पुंयोग इत्येव आचार्या स्वयं व्याख्यात्री अर्यक्षत्रियाभ्यां वा स्वार्थे अर्याणी अर्या स्वामिनी वैश्या वेत्यर्थः क्षत्रियाणी आर्या क्ष
त्रिया कथं तर्ह्यर्याणीति तु स्वाणमानयतीं ङीवयतीति कर्मण्यण् क्रीतात्करणपूर्वात् क्रीतांताददंतात् करणादेः स्त्रियां ङीष् स्यात्
वस्त्रक्रीती क्वचिन्न धनक्रीता क्तादल्पाख्यायां करणादेः क्रीतांताददंतान्ङीष् स्यादल्पत्वे द्योत्ये अभ्रलिप्ती द्यौः बहुव्रीहेश्चांतोदा
त्तात् बहुव्रीहेः क्तांतादंतोदात्ताददंतात् स्त्रियां ङीष् स्यात् जातिपूर्वादिति वक्तव्यं तेन बहुकृतनखकाकलसुरवादिपूर्वान्न ऊरुभि
न्नी नेह बहुक्रीता जातांतात् दंतजाता पाणिगृहीतीं भार्यायां पाणिगृहीतान्या अस्वांगपूर्वपदाद्वा पूर्वेण नित्ये प्राप्ते विक
ल्पोयं सुरापीती सुरापीता अंतोदात्तात् किं वस्त्रच्छिन्ना अनाच्छादनादित्यादात्तनिषेधः अत एव पूर्वेणापि न ङीष् स्वांगाच्चोप
सर्जनादसंयोगोपधात् असंयोगोपधमुपसर्जनं यत्स्वांगं तदंताददंतात्स्यादिति पदिकाद्वा ङीष् स्यात् केशान् तिक्रांता अतिके
शी अतिकेशा चंद्रमुखी चंद्रमुखा संयोगोपधात्तु सुगुल्फा उपसर्जनात् किं शिखा स्वांगं त्रिधा अद्रवं मूर्तिमत्स्वांगं प्राणिस्थ
मविकारजं सुस्वेदा द्रवत्वात् सुज्ञाना अमूर्तत्वात् सुमुखा शाला अप्राणिस्थत्वात् सुशोफा विकारजत्वात् अतस्थं तत्र दृष्ट
वसुकेशी सुकेशा वा रथ्या अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् तेन चेत्तथायुक्तं च सुस्तनी सुस्तना प्रतिमा प्राणिवत्प्राणिसदृ
शे स्थितत्वात् नासिकोदरोष्ठजंघादंतकर्णशृंगाच्च एभ्यो वा ङीष् आद्ययोर्बह्वज्लक्षणो निषेधो बाध्यते पुरस्तादपवा
दन्यायात् उष्ठादीनां पंचानां तु असंयोगोपधादिति बाध्यते मध्येऽपवादन्यायात् सहनञ्विद्यलक्षणस्तु प्रतिषेधः परत्वादस्य

बाधकः तुंगनासिकी तुंगनासिका इत्यादि नेह सहनासिका अत्र वृत्तिः अंगगात्रकंठेभ्यो वक्तव्यं स्वंगी स्वंगेत्यादि पृथ्वाद्यनुक्त
समुच्चयार्थेन चकारेण संग्राह्यमिति केचित् तद्भाष्याद्यनुक्तत्वादप्रमाणमिदमिति प्रामाणिकाः अत्र वार्त्तिका नियमार्थं सुगुल्फी सु
गुल्फा कवरमणिविषशरेभ्यो नित्यं कवरं चित्रं पुच्छमस्याः सा कवरपुच्छी इत्यादि उपमानात् पक्षाच्च पुच्छाच्च नित्यमित्येव उलूकपक्षी शा
ला उलूकपुच्छी सेना न क्रोडादिबह्वचः क्रोडादेर्बह्वचश्च स्वांगान्न ङीष् कल्याणक्रोडा अश्वानामुरः क्रोडा आकृतिगणोयं सु
जघना सहनञ्विद्यमानपूर्वाच्च सहेत्यादि विकल्पे प्राप्ते ङीष् सकेशा अकेशा विद्यमानकेशा नखमुखात्संज्ञायां न ङीष् स्या
त् शूर्पणखा गौरमुखा संज्ञायां किं ताम्रमुखी कन्या दिक्पूर्वपदान्ङीष् दिक्पूर्वपदात्स्वांगांतात्प्रातिपदिकात्परस्य ङी
षो ङीबादेशः स्यात् प्राङ्मुखी आक्रन्दनौपदं वाहः वाहंतात्प्रातिपदिकान्ङीष् ङीषेवानुवर्त्तते न ङीप् इति वाद्दुमेदि वोदाव
मे सख्यशिश्वीति भाषायां इति ङीष् ईकारेण भाषायामित्यस्यानंतरं उष्ठब्धः तेन छंदस्यपि क्वचित् सखी अशिश्वी आधेनवाश्रुन
येतमशिश्वी जातेरस्त्रीविषयादयोपधात् जातिवाचि यन्नच स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात् आकृतिग्रहणा
जातिः अनुगतसंस्थानव्यंग्येत्यर्थः तटी लिंगानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या असर्वलिंगत्वे सत्येकस्यां व्यक्तौ कथ
नाद्व्यक्त्यंतरे कथनं विनापि सुग्रहा जातिरिति लक्षणांतरं वृषली सत्यंतं किं शुक्ला सकृदित्यादि किं देवदत्ता गोत्रं चचरणैः स
पत्र ह अप्रत्ययांतः शाखाध्येतृवाची शब्दो जातिकार्यं लभते इत्यर्थः अपगवी कठी बह्वृची ब्राह्मणी त्वत्र तु शार्ङ्गरवादिपाठात्
नोङीङीषाद्यते जातेः किं मुंडा अस्त्रीविषयात् किं बलाका अयोपधात् किं क्षत्रिया योपधप्रतिषेधे गवयहयमुकयमत्स्य ३१
मनुष्याणामप्रतिषेधः गवयी हयी मुकयी हलस्तद्धितस्येति यलोपः मनुषी मत्स्यस्यङ्यां मत्सी पाककर्णपर्णपुष्पफलमूल
वालोत्तरपदाच्च पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात् ओदनपाकी शंकुकर्णी शालपर्णी शंखपुष्पी

दासीफलीदर्भमूलीगोवाली उपधिविशेषरूढा एते इतोमनुष्यजातेः ङीष्यात् दाक्षी योपधादपि उदमेयस्यापत्यं औ
दमेयी मनुष्येति किं तित्तिरिः ऊङुतः उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात् कुरूः कुरुनादित्वाण्ण
ः तस्य स्त्रियामवंतीत्यादिना लुक् अयोपधा किं अध्वर्युर्ब्राह्मणी अप्राणिजातेश्चारज्ज्वादी नामुपसंख्यानं रज्ज्वादिपर्यु
दासादुवर्णेत्यस्य एव अलाबूः कर्कंधूः अनयोर्दीर्घान्तत्वं पिनोङ् धातोरिति विसकर्फदात्तत्वप्रतिषेधकूङः फल प्राणिजाति
स्क कृकवाकुः रज्ज्वादेस्करज्जुः हनुः बाह्वंतात्संज्ञायां स्त्रियामूङ् मद्रबाहूः संज्ञायां किं वृत्तबाहुः पंगोश्च पंगूः श्वशुरस्यो
काराकारलोपश्च वा श्वश्रूः योगलक्षणस्य ङीषोऽपवादः लिंगविशिष्टपरिभाषया श्वादयः श्वश्रूः ऊरूत्तरपदादौपम्ये
उपमानवाचिपूर्वपदमूरूत्तरपदं यस्य प्रातिपदिकं तस्मादूङ् स्यात् करभोरूः संहितशफलक्षणवामादेश्च अनौपम्यार्थ
मिदं संहितोरूः सेवशफोरूः शफौ खुरौ तादिव संश्लिष्टत्वादुपचारात् लक्षणशब्दाच्छ्रीयाद्यर्थे लक्षणोरूः वामोरूः
सहितसहाभ्यां चेति वक्तव्यं हितेन सह सहितो ऊरू यस्याः सा सहोरूः यद्वा विद्यमानवचनस्य सहशब्दस्य ऊवरिति न्यायप्रतिपादना
दप्रयोगः संज्ञायां कद्रुकमण्डल्वोः संज्ञायां स्त्रियामूङ् कद्रूः कमण्डलूः संज्ञायां किं कद्रुः कमण्डलुः अल्पदीर्घवचने शार्ङ्गरवा
द्यञोङीन् शार्ङ्गरवादेरञो यो कारस्तदन्ताज्जातिवाचिनो ङीन् स्यात् शार्ङ्गरवी बैदी जातेरित्यनुवृत्तेः पुंयोगे ङीषेव नृनरयो
र्वृद्धिश्चेति गणसूत्रं नारी यङश्चाप् यङन्तात् स्त्रियां चाप् स्यात् ष्यङ् ष्यङोः सामान्यग्रहणं आम्बष्ठ्या कारीषगंध्या बाह्यत्रश्चाबाह्यः
योति माभूत् आवष्ट्याश्च अस्माच्चाप् स्यात् यञश्चेति ङीपोऽपवादः अवटशब्दो गर्गादिः आवट्याः तद्धिताः आपञ्चमसमाप्तेरधिका
रोऽयं यूनस्तिः युवन्शब्दात्तिप्रत्ययः स्यात् स च तद्धितः लिंगविशिष्टपरिभाषया सिद्धे तद्धिताधिकारश्चतुरर्थः युवतिः अनु
पसर्जनादित्येव बहवो युवानो यस्यां सा बहुयुवा युवती उगितश्चेति ङीपि विबोध्यम् ॥इति स्त्रीप्रत्ययाः॥ २५ प्रातिप

दिकार्थलिंगपरिमाणवचनमात्रे प्रथमा नियतोपस्थितिकः प्रातिपदिकार्थः मात्रशब्दस्य प्रत्येकं योगः प्रातिपदिकार्थमात्रे लि
गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् उच्चैः नीचैः कृष्णः श्रीः ज्ञानं अलिंगा नियतलिंगाश्च प्रातिपदिकार्थमात्रे इत्यस्यो
दाहरणं अनियतलिंगास्तु लिंगमात्राधिक्यस्य तटः तटी तटं परिमाणमात्रे द्रोणो व्रीहिः द्रोणरूपं यत्परिमाणं तत्परिछिन्न
इत्यर्थः प्रत्ययार्थे परिमाणे प्रकृत्यर्थो ऽभेदेन संसर्गेण विशेषणं प्रत्ययार्थस्तु परिछेद्यपरिछेदकभावेन प्रकृत्यर्थे विशेषण
मिति विवेकः वचनं संख्या एकः द्वौ बहवः इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनं संबोधने च इह प्रथमा स्यात् हे राम कारके इत्य
धिकृत्य कर्तुरीप्सिततमं कर्म कर्तुः क्रिययाप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् कर्तुः किं माषेष्वश्वं बध्नाति कर्मणः ईप्सिता
माषा न कर्तुः तमब्ग्रहणं किं पयसा ओदनं भुंक्ते कर्मेत्यनुवृत्तौ कर्मग्रहणमाधारनिवृत्त्यर्थं अन्यथा गेहं प्रविशतीत्यत्रैव स्या
त् अनभिहिते इत्यधिकृत्य कर्मणि द्वितीया अनुक्ते कर्मणि द्वितीया स्यात् हरिं भजति अभिहिते तु कर्मणि प्रातिपदिकार्थ
इति- मात्रे प्रथमैव अभिधानं प्रायेण तिङ्कृत्तद्धितसमासैः तिङ् हरिः सेव्यते कृत् लक्ष्म्या सेवितः तद्धितः शतेन क्रीतः शत्यः स
मासः प्राप्त आनंदो यं प्राप्तानंदः क्वचिन्निपातेनाभिधानं यथा विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतं सांप्रतमित्यस्य हि प्रयुज्य
ते इत्यर्थः तथायुक्तं चानीप्सितं ईप्सिततमवत् क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् ग्रामं गच्छन् तृणं स्पृशति
विषं भुंक्ते अकथितं च अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् दुह्याच्पच्दंडुधिप्रछिचिब्रूशासुजिमथमुषां
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहां १ दुह्यादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवकथितं कर्म ३२
तिपरिगणनं कर्तव्यमित्यर्थः गां दोग्धि पयः बलिं याचते वसुधां अविनीतं विनयं याचते तंडुलानोदनं पचति गर्गान् शतं दंडयति
ति व्रजमवरुणद्धि गां माणवकं पंथानं पृच्छति वृक्षमवचिनोति फलानि माणवकं धर्मं ब्रूते शास्ति वा शतं जयति देवदत्तं सुधां

क्षीरधिमश्नाति देवदत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वा अर्थनिबन्धनेयं संज्ञा बलिं भिक्षते वसुधां माण
वकं धर्मं भाषते अभिधत्ते वक्तीत्यादि अकारकं किं माणवकस्य पितरं पन्थानं पृच्छति अकर्मकधातुभिर्योगे देशः कालो भावो गन्त
गमन ज्ञान भक्षाहार
व्योऽध्वा च कर्मसंज्ञक इति वाच्यं कुरून्स्वपिति मासमास्ते गोदोहमास्ते गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता
स णौ गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात् शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् आ
शयच्चामृतं देवान् वेदमध्यापयद्विधिं आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः गतीत्यादि किं पाचयत्योदनं देवदत्तेन
अण्यन्तानां किं गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुंक्ते गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः नीवह्योर्न नाययति वा
हयति वा भारं भृत्येन नियन्तृकर्तृकस्य वहेरनिषेधः वाहयति रथं वाहान्सूतः आदिखाद्योर्न आदयति खादयति वा अन्नं बटु
ना भक्षेरहिंसार्थस्य न भक्षयत्यन्नं बटुना अहिंसार्थस्य किं भक्षयति सस्यं बलीवर्दान् जल्पतिप्रभृतीनामुपसंख्यानं जल्पय
ति भाषयति पुत्रं देवदत्तः दृशेश्च दर्शयति हरिं भक्तान् सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्यनेन ज्ञाप्य
ते तेन स्मरति जिघ्रत्यादीनां न स्मारयति घ्रापयति देवदत्तेन शब्दायतेर्न शब्दाययति देवदत्तेन धात्वर्थसंगृहीतकर्मत्वेनाकर्मक
त्वात्प्राप्तिः येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः न त्वविवक्षितकर्माणोऽपि तेन मासमासयति देवदत्तमित्यादौ क
र्मत्वं भवति देवदत्तेन पाचयतीत्यादौ तु न हृक्रोरन्यतरस्याम् हृक्रोरणौ यः कर्ता स णौ वा कर्म स्यात् हारयति कारयति वा भृत्येन भृत्यं वा क
टं अभिवादिदृशोरात्मनेपदे वेति वाच्यं अभिवादयते दर्शयते देवं भक्तेन भक्तं वा अधिशीङ्स्थासां कर्म अधिपूर्वाणामेषामा
धारः कर्म स्यात् अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः अभिनिविशश्च अभिनिपूर्वस्य विशतेराधारः कर्म
स्यात् अभिनिविशते सन्मार्गं परिक्रयणे संप्रदानमिति सूत्रादिह मण्डूकप्लुत्यान्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रय

णात् कश्चिन्न पापेऽभिनिवेशः उपान्वध्याङ्वसः उपादिपूर्वस्य वसतेराधारः कर्म स्यात् उपवसति अनुवसति अधिवसति आव
सति वा वैकुंठं हरिः अभुक्त्यर्थस्य न वने उपवसति उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितांतेषु ततोऽन्यत्रापि
दृश्यते उभयतः कृष्णं गोपाः सर्वतः कृष्णं धिक् कृष्णाभक्तं उपर्युपरि लोकं हरिः अध्यधि लोकं अधोऽधो लोकं अभितः परित
ः समया निकषा हा प्रतियोगेऽपि अभितः कृष्णं परितः कृष्णं ग्रामं समया निकषा लंकां हा कृष्णाभक्तं तस्य शोच्यतेत्यर्थः बुभुक्षितं
न प्रतिभाति किंचित् अंतरांतरेण युक्ते आभ्यां योगे द्वितीया स्यात् अंतरा त्वां मां हरिः अंतरेण हरिं न सुखं कर्मप्रवचनीयाः इ
त्यधिकृत्य अनुर्लक्षणे लक्षणे द्योत्येऽनुरुक्तसंज्ञः स्यात् गत्युपसर्गसंज्ञापवादः कर्मप्रवचनीययुक्ते द्वितीया एतेन यो
गे द्वितीया स्यात् जपमनु प्रावर्षत् हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः परापि हेतौ तृतीयानेन बाध्यते लक्षणेत्थंभूतेत्यादि
ना सिद्धे पुनः संज्ञाविधानसामर्थ्यात् तृतीयार्थे अस्मिन् द्योत्येऽनुरुक्तसंज्ञः स्यात् नदीमन्ववसिता सेना नद्या सह संबद्धे
त्यर्थः षिञ् बंधने क्तः हीने हीने द्योत्येऽनुरुक्तसंज्ञः स्यात् अनु हरिं सुराः हरेर्हीना इत्यर्थः उपोऽधिके च अधिके हीने च द्योत्ये उ
पेत्यव्ययं प्राक्संज्ञः स्यात् अधिके सप्तमी वक्ष्यते हीने उप हरिं सुराः लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः एष्वर्थेषु
विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः लक्षणे वृक्षं प्रति परि अनु वा विद्योतते विद्युत् इत्थंभूताख्याने भक्तो विष्णुं प्रति परि
अनु वा भागे लक्ष्मीर्हरिं प्रति परि अनु वा हरेर्भाग इत्यर्थः वीप्सायां वृक्षं २ प्रति परि अनु वा सिंचति अत्रोपसर्गत्वाभावान्न ष २२
त्वं एषु किं परिषिंचति अभिरभागे भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात् हरिमभिवर्त्तते भक्तो हरिमभि पर्यागच्छति गति
संज्ञाबाधात् गतिर्गताविति निघातो न सुः पूजायां +देवं देवमभि सिंचति अभागे किं यदत्र ममाभिष्यात्तद्दीयतां अधिपरी अन
र्थकौ उक्तसंज्ञौ स्तः कुतोऽध्यागच्छति कुतः+ यां सुसिक्तं सुस्तुतं अनुपसर्गत्वान्न षः पूजायां किं सुषिक्तं किं तवात्र क्षेपोयं

+श्री+

अतिरतिक्रमणे च अतिक्रमणे इज्जायां चातिः कर्मप्रवचनीयः स्यात् अति देवान् कृष्णः अपिः पदार्थसंभावनान्ववसर्गगर्हा
समुच्चयेषु एषु द्योत्येषु अपिः कर्मप्रवचनीयसंज्ञः स्यात् सर्पिषोपि स्यात् अनुपसर्गत्वान्न षः संभावनायां लिङ् तस्या एवविषयस्त्वेषु सत्स्वनुक्तं
र्ष्प्रभुक्तं दोर्लक्ष्मीदोर्लस्य द्योतयन्नपि द्वितीयः स्यादित्यनेन संबंध्यते सर्पिष इति षः अपिशब्दबलेन गम्यमानस्य बिंदोरवयवाव
यविभावसंबंधे इत्यमेव स्यात् अपि द्वितीयस्य पदार्थद्योतकानाम द्वितीया तु नेदमुक्तं सर्पिषो बिंदुना योगो न त्वपि नेत्युक्तं वात्
अपि स्तुयाद्विष्णुं संभावनं शक्त्युत्कर्षमाविष्कर्तुमित्यर्थः अपि सिंच हि अन्ववसर्गः कामचारानुज्ञा धिग्देवदत्तं अपि स्तुयात् वृष
लं गर्हा अपि सिंच अपि स्तुहि समुच्चये कालाध्वनोरत्यंतसंयोगे इह द्वितीया स्यात् मासं कल्याणी मासमधीते मासं गुडधा
नाः क्रोशं कुटिला नदी क्रोशमधीते क्रोशं गिरिः अत्यंतसंयोगे किं मासस्य द्विरधीते क्रोशस्यैकदेशे पर्वतः स्वतंत्रः कर्ता
क्रियायां स्वातंत्र्येण विवक्षितोऽर्थः कर्त्तासंज्ञः स्यात् साधकतमं करणं क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् तमबग्रह
णं किं गंगायां घोषः कर्तृकरणयोस्तृतीया अनभिहिते कर्तरि करणे च तृतीया स्यात् रामेण बाणेन हतो वालिः प्रकृत्यादिभ्य उपसंख्या
नं प्रकृत्या चारुः प्रायेण याज्ञिकः गोत्रेण गार्ग्यः समेनैति विषमेणैति द्विद्रोणेन धान्यं क्रीणाति सुखेन दुःखेन वा यातीत्यर्थः दिवः
कर्म च दिवः साधकतमं कर्मसंज्ञं स्याच्चात् करणसंज्ञं अक्षैः अक्षान्वा दीव्यति अपवर्गे तृतीया अपवर्गः फलप्राप्तिस्तस्यां द्योत्या
यां कालाध्वनोरत्यंतसंयोगे तृतीया स्यात् अह्ना क्रोशेन वानुवाकोऽधीतः फलप्राप्तिः किं मासमधीतो नायातः सहयुक्तेऽप्रधा
ने सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् पुत्रेण सहागतः पिता एवं साकं सार्द्धं योगेपि विनापि तद्योगं तृतीया वृद्धो यूनेत्यादिनि समं×
र्द्देशात् येनांगविकारः येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया स्यात् अक्ष्णा काणः अक्षिसंबंधिकाणत्वविशि
ष्ट इत्यर्थः अंगविकारः किं अक्षि काणमस्य इत्थंभूतलक्षणे किंचित्प्रकारमापन्नस्य लक्षणे तृतीया स्यात् जटाभिस्तापसः

ऽदाज्ञापयता प्रसववितिनिहइ त्यर्थः संज्ञोन्यतरस्यांकर्मणि संपूर्वस्य जानातेः कर्मणि तृतीया वा स्यात् पित्रा पितरं वा संजा-
नीते देवो देवैर्हेतौ तृतीया स्यात् द्रव्यादि साधारणं निर्व्यापारसाधारणं च हेतुत्वं करणत्वं क्रियामात्रविषयं व्यापारनियतं च दण्डे-
न घटः पुण्येन दृष्टो हरिः फलमपीह हेतुः अध्ययनेन वसति गम्यमानापि क्रिया विनिर्क्रोप्रयोजिका अलंश्रमेण श्रमेण साध्यं
नास्तीत्यर्थः इह साधनक्रियां प्रति श्रमः करणं शतेन शतस्यान् परिवाप्यति पद्यः शतेन परिच्छिद्य इत्यर्थः अशिष्टव्यवहारे दा-
णः प्रयोगे चतुर्थ्यर्थे तृतीया दास्या संयच्छते कामुकः धर्म्ये तु भार्यायै संयच्छति कर्मणा यमभिप्रैति स संप्रदानं दानस्य कर्मणा
यमभिप्रैति स संप्रदानसंज्ञः स्यात् चतुर्थी संप्रदाने विप्राय गां ददाति अनभिहिते इत्येव दानीयो विप्रः क्रियया यमभिप्रैति
सोपि संप्रदानं पत्ये शेते कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा पशुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थः रुच्यर्था-
नां प्रीयमाणः रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः संप्रदानं स्यात् हरये रोचते भक्तिः अन्यकर्तृकोऽभिलाषो रुचिः हरिनि-
ष्ठप्रीतेर्भक्तिः कर्त्री प्रीयमाणः किं देवदत्ताय रोचते मोदकः पथि श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः एषां प्रयोगे बोधयितुमि-
ष्टः संप्रदानं स्यात् गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा ज्ञीप्स्यमानः किं देवदत्ताय श्लाघते पथि धारेरुत्तमर्णः
धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात् भक्ताय धारयति मोक्षं हरिः उत्तमर्णः किं देवदत्ताय शतं धारयति ग्रामे स्पृहेरीप्सि-
तः स्पृहयतेः प्रयोगे इष्टः संप्रदानं स्यात् पुष्पेभ्यः स्पृहयति ईप्सितः किं पुष्पेभ्यो वने स्पृहयति ईप्सितमात्रे इयं संज्ञा प्रक- ३४
र्षविवक्षायां तु परत्वात् कर्मसंज्ञा पुष्पाणि स्पृहयति क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः
स उक्तसंज्ञः स्यात् हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति यं प्रति कोप इति किं भार्यामीर्ष्यति मैनामन्योऽद्राक्षीदिति क्रोधो-
ऽमर्षः द्रोहोऽपकारः ईर्ष्याक्षमा असूया गुणेषु दोषाविष्करणं द्रोहादयोपि कोपप्रभवा एव गृह्यन्ते तेन विशेषणं सामान्येन यं प्र-

तिकोपश्च क्रुधद्रुहोरुपसृष्टयोः कर्म॥ सोपसर्गयोरनयोर्योगे यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात्॥ क्रूरमभिक्रुध्यति अभिद्रु
ह्यति॥ राधीक्ष्योर्यस्य विप्रश्नः॥ एतयोः कारकं संप्रदानं स्यात् यदीयो विविधः प्रश्नः क्रियते॥ कृष्णाय राध्यति ईक्षते इत्यादि॥ गर्गः शु
भाशुभं पर्यालोचयतीत्यर्थः॥ प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता॥ आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्ता संप्र
दानं स्यात्॥ विप्राय गां प्रतिशृणोति आशृणोति वा॥ विप्रेण मह्यं देहीति प्रवर्तितः प्रतिजानीत इत्यर्थः॥ अनुप्रतिगृणश्च॥ आभ्यां
गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात्॥ होत्रेऽनुगृणाति प्रतिगृणाति॥ होता प्रथमं शंसति तमध्वर्युः प्रोत्साह
यतीत्यर्थः॥ परिक्रयणे संप्रदानमन्यतरस्याम्॥ नियतकालं भृत्या स्वीकरणं परिक्रयणं तस्मिन्साधकतमं कारकं संप्रदानसं
ज्ञं वा स्यात्॥ शतेन शताय वा परिक्रीतः॥ तादर्थ्ये चतुर्थी वाच्या॥ मुक्तये हरिं भजति॥ क्लृपि संपद्यमाने च॥ भक्तिर्ज्ञानाय कल्पते
संपद्यते जायते इत्यादि॥ उत्पातेन ज्ञापिते च॥ वाताय कपिला विद्युत्॥ हितयोगे च॥ ब्राह्मणाय हितं॥ क्रियार्थोपपदस्य च कर्मणि
स्थानिनः॥ क्रियार्थक्रियोपपदस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्॥ फलेभ्यो याति फलान्याहर्तुमित्य चं
र्थः॥ नमस्कुर्मो नृसिंहाय नृसिंहमनुकूलयितुमित्यर्थः॥ एवं स्वयंभुवे नमस्कृत्येत्यादावपि॥ तुमर्थाच्च भाववचनात्॥ भाववचना
यो श्चेति सूत्रेण विहितो यस्तदन्ताच्चतुर्थी स्यात्॥ यागाय याति यष्टुं यातीत्यर्थः॥ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च॥ एभिर्योगे चतुर्थी
स्यात्॥ हरये नमः॥ उपपदविभक्तेः कारकविभक्तिर्बलीयसी॥ नमस्करोति देवान्॥ प्रजाभ्यः स्वस्ति॥ अग्नये स्वाहा॥ पितृभ्यः स्वधा॥
अलमिति पर्याप्त्यर्थग्रहणं तेन दैत्येभ्यो हरिरलं प्रभुः शक्तः समर्थ इत्यादि॥ प्रभ्वादियोगे षष्ठ्यपि साधुः॥ तस्मै प्रभवति स एषां ग्राम
णीरिति निर्देशात्॥ तेन प्रभुर्बुभूषुर्भुवनत्रयस्य॥ इति सिद्धं वषडिन्द्राय॥ चकारः पुनर्विधानार्थः॥ तेनाशीर्विवक्षा
यां परामपि चतुर्थीं बाधित्वा चतुर्थ्येव भवति स्वस्ति गोभ्यो भूयात्॥ मन्यकर्मण्यनादरे विभाषाऽप्राणिषु॥ प्रा

णिवर्त्तेमिन्यते: कर्म्मणि चतुर्थी वा स्यात् तिरस्कारे न त्वां तृणं मन्ये तृणाय वा अप्राणिनिर्द्देशाच्छ्वानं नादिकयोगेन न त्वां तृणं मन्ये अ
प्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्ज्जेष्विति वक्तव्यं तेन न त्वां नावं अन्नं मन्य इत्यत्र प्राणित्वेपि चतुर्थी न न त्वां शुने
मन्ये इत्यत्र प्राणित्वेपि सर्वत्रैव गत्यर्थकर्म्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनि अध्वभिन्ने गत्यर्थानां कर्म्मणि एते स्तः चेष्टायां
ग्रामं ग्रामाय वा गच्छति चेष्टायां किं मनसा हरिं व्रजति अनध्वनीति किं पन्थानं गच्छति गन्त्राधिष्ठिते अध्वन्येवायं निषेधः उ
दत्पथात्पथ एव क्रमितुमिष्यते सदा चतुर्थी सर्वत्रैव उत्पथेन पथे गच्छति ध्रुवमपायेऽपादानं अपायो विश्लेषस्तस्मिन्
साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात् अपादाने पंचमी ग्रामादायाति धावतोऽश्वात्पततीति कारकं किं वृक्षस्य पर्णं प
ततीति जुगुप्साविरामप्रमादार्थानामुपसंख्यानं पापाज्जुगुप्सते विरमति धर्मात्प्रमाद्यति भीत्रार्थानां भयहेतुः भयार्थानां त्रा
णार्थानां च योगे भयहेतुरपादानं स्यात् चोराद्बिभेति चोरात्त्रायते भयहेतुः किं अरण्ये बिभेति त्रायते वा पराजेरसोढः प
राजेः प्रयोगे असोढोऽपादानं स्यात् अध्ययनात्पराजयते ग्लायतीत्यर्थः असोढः किं शत्रून्पराजयते अभिभवतीत्यर्थः
वारणार्थानामीप्सितः प्रवृत्तिविघातो वारणं वारणार्थानां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात् यवेभ्यो गां वारयतीति ईप्सितः किं
यवेभ्यो गां वारयति क्षेत्रे अन्तर्द्धौ येनादर्शनमिच्छति व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं
स्यात् मातुर्निलीयते कृष्णः अन्तर्द्धौ किं चोरान्न दिदृक्षते इच्छतीति ग्रहणं किं अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्
आख्यातोपयोगे नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात् उपाध्यायादधीते उपयोगे किं नटस्य शृणोति जनि
कर्त्तुः प्रकृतिः जायमानस्य हेतुरपादानं स्यात् ब्रह्मणः प्रजाः प्रजायन्ते भुवः प्रभवः भूकर्त्तुः प्रभवस्तथा हिमवतो गंगा
प्रभवति तत्र प्रकाशत इत्यर्थः ल्यब्लोपे कर्म्मण्यधिकरणे प्रासादात्प्रेक्षते आसनात्प्रेक्षते प्रासादमारुह्य आसने उपवि

ऽपेक्षते इत्यर्थः श्वशुराज्जिह्रेति श्वशुरं वीक्ष्य इत्यर्थः गम्यमानापि क्रियाकारकविभक्तीनां निमित्तं कस्मात्त्वं नद्याः यतश्चाध्व
कालनिर्माणं तत्र पंचमी वक्तव्या देवनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्या वनात् ग्रामो योजने योजनं वा कार्तिक्या आग्र
हायणी मासे अन्यारादितरर्त्ते दिक्शब्दांचूत्तरपदाजाहियुक्ते एतैर्योगे पंचमी अन्य इत्यर्थग्रहणं इतरग्रहणं प्रपंचार्थं अन्यो
भिन्न इतरो वा कृष्णात् आराद्वनात् ऋते कृष्णात् पूर्वो ग्रामात् दिशि दृष्टः शब्दो दिक्शब्दः तेन संप्रति देशकालवृत्तिना
योगेऽपि भवति चैत्रात्पूर्वः फाल्गुनः अवयवावयवियोगे तु न तस्य परमाम्रेडितमिति निर्देशात् पूर्वं कायस्य अंचूत्तरपदस्य
दिक्शब्दत्वेऽपि षष्ठ्यतसर्थ इति षष्ठीबाधितेऽपि ग्रहणं प्राक् प्रत्यक् ग्रामात् आचूत्तरपदत्वात् दक्षिणा ग्रामात् आहि दक्षिणाहि ग्रामात्
अपादाने पंचमीति सूत्रे कार्तिक्याः प्रभृतीति तात्पर्ययोगात् प्रभृतियोगे पंचमी भवात्प्रभृति आरभ्य सेव्यो हरिः अपप
रिबहिरिति समासविधानात् ज्ञापकात् बहिर्योगेऽपि पंचमी ग्रामाद्बहिः अप परी वर्जने एतौ वर्जने कर्मप्रवचनीयौ स्तः आङ् म
र्यादावचने आङ् मर्यादायामुक्तसंज्ञः वचनग्रहणादभिविधावपि पंचम्यपाङ्परिभिः एतैः कर्मप्रवचनीयैर्योगे पंचमी स्या
त् अप हरेः परि हरेः संसारः परिरत्र वर्जने लक्षणादौ तु हरिं परि आमुक्तेः संसारः आ सकलाद्ब्रह्म प्रतिः प्रतिनिधिप्रतिदान
योः एतयोरर्थयोः प्रतिरुक्तसंज्ञः प्रतिनिधिप्रतिदाने च यस्मात् अत्र कर्मप्रवचनीयैर्योगे पंचमी स्यात् प्रद्युम्नः कृष्णात्प्रति
तिलेभ्यः प्रतियच्छति माषान् अकर्तर्यृणे पंचमी कर्तृवर्जितं यदृणं हेतुभूतं ततः पंचमी शताद्बद्धः अकर्तरीति किं शतेन बं
धितः विभाषा गुणेऽस्त्रियां गुणे हेतावस्त्रीलिंगे पंचमी वा स्यात् जाड्यात् जाड्येन वा बद्धः गुणे किं धनेन कुलं अस्त्रियां किं बु
द्ध्या मुक्तः विभाषेति योगविभागात् गुणे स्त्रियां च क्वचित् धूमादग्निमान् नास्ति घटोऽनुपलब्धेः पृथग्विनानानाभिस्तृतीया
न्यतरस्यां एतैर्योगे तृतीया स्यात् पंचमी द्वितीया च अन्यतरस्यांग्रहणं समुच्चयार्थं पंचमी द्वितीया अनुवर्तते पृथक् रामेण रा

मातरमेवा एवं विना नाना करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य एभ्यो ऽद्रव्यवचनेभ्यः करणे तृतीयापंचम्यौ स्तः
स्तोकेन स्तोकाद्वा मुक्तः इत्येव स्तोकेन विषेण हतः दूरान्तिकार्थेभ्यो द्वितीया च एभ्यो द्वितीया स्यात् चात् पंचमीतृतीये प्रातिपदि
कार्थमात्रे विधिरयं ग्रामस्य दूरं दूरात् दूरेण वा अंतिकं अंतिकात् अंतिकेन वा असत्ववचनस्येत्यनुवृत्तेर्नेह दूरः पंथाः षष्ठी शेषे कार
कप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषः तत्र षष्ठी राज्ञः पुरुषः कर्मादीनामपि संबंधविवक्षायां षष्ठ्येव सतां गतं स
र्पिषो जानीते मातुः स्मरति एधोदकस्योपस्कुरुते भजे शंभोश्चरणयोः फलानां तृप्तः षष्ठी हेतुप्रयोगे हेतुशब्दप्रयोगे हेतौ द्योत्ये
षष्ठी स्यात् तृतीया च केन हेतुना वसति कस्य हेतोर्वसति निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनं किं निमित्तं वसति केन निमि
त्तेन कस्मै निमित्ताय इत्यादि एवं किं कारणं को हेतुः किं प्रयोजनमित्यादि प्रायग्रहणाद सर्वनाम्नः प्रथमा द्वितीये न स्तः ज्ञानेन नि
मित्तेन हरिः सेव्यः ज्ञानाय निमित्ताय इत्यादि षष्ठ्यतसर्थप्रत्ययेन एतद्योगे षष्ठी स्यात् दिक्शब्देति पंचम्या अपवादः ग्रामस्य दक्षि
णतः पुरः पुरस्तात् उपरि उपरिष्टात् एनपा द्वितीया एनबंतेन योगे द्वितीया स्यात् एनपेति योगविभागात् षष्ठ्यपि दक्षिणेन
ग्रामं ग्रामस्य वा एवमुत्तरेण दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् एतैर्योगे षष्ठी स्यात् पंचमी च दूरं निकटं वा ग्रामस्य ग्रामाद्वा ज्ञोऽविद
र्थस्य करणे जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् सर्पिषो ज्ञानं अधीगर्थदयेशां कर्मणि एषां कर्मणि शेषे
षष्ठी स्यात् मातुः स्मरणं सर्पिषो दयनं ईशनं वा कृञः प्रतियत्ने कृञः कर्मणि शेषे षष्ठी गुणाधाने एधोदकस्योपस्करणं रुजार्थ
नां भाववचनानामज्वरेः भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी चौरस्य रोगस्य रुजा अज्वरिसंताप्योरिति वा म० ३६
च्यं रोगस्य चौरज्वरः चौरसंतापो वा रोगकर्तृकं चौरसंबंधि ज्वरादिकमित्यर्थः आशिषि नाथः आशीरर्थस्य नाथतेः शेषे कर्मणि
षष्ठी सर्पिषो नाथनं आशीः सर्पिः किं माणवकनाथनं तत्संबंधिनी याच्ञेत्यर्थः जासिनिप्रहणनाटक्राथपिषां हिंसायां हिंसार्थानाम

षां शेषे कर्मणि षष्ठी चौरस्योज्जासनं निप्रौ संहतौ विपर्यस्तौ व्यस्तौ च चौरस्य निप्रहणनं प्रणिहननं निहननं प्रहणनं वा नट स्पंदने
चुरादिः चौरस्योन्नाटनं चौरस्य क्राथनं वृषलस्य पेषणं हिंसायां किं धानापेषणं व्यवहृपणोः समर्थयोः शेषे कर्मणि षष्ठी स्यात्
द्यूते क्रयविक्रय व्यवहारे चानयोस्तुल्यार्थता शतस्य व्यवहरणं पणनं वा समर्थयोः किं शलाकाव्यवहारः गणनेत्यर्थः ब्राह्म
णपणनं स्तुतिरित्यर्थः दिवस्तदर्थस्य द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य दिवः कर्मणि षष्ठी स्यात् शतस्य दीव्यति तदर्थ
स्य किं ब्राह्मणं दीव्यति स्तौतीत्यर्थः विभाषोपसर्गे पूर्वयोगापवादः शतस्य शतं वा प्रदीव्यति प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने देव
तासंप्रदाने वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वाचकाच्छब्दात् षष्ठी स्यात् अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य
ः अनुब्रूहि वा कृत्वोर्थप्रयोगे कालेऽधिकरणे कृत्वोर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी पंचकृत्वोऽह्नो भोजनं द्वि
रह्नो भोजनं शेषे किं द्विरहन्यध्ययनं कर्तृकर्मणोः कृति कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् कृष्णस्य कृतिः जगतः कर्ता कृ
ष्णः गौणे कर्मणि विवक्ष्यते नेताश्वस्य स्रुघ्नस्य स्रुघ्नं वा कृति किं तद्धिते मा भूत् कृतपूर्वी कटं उभयप्राप्तौ कर्मणि उभयोः प्राप्तिर्य
स्मिन् कृति तत्र कर्मण्येव षष्ठी स्यात् आश्चर्यो गवां दोहोऽगोपेन स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः भेदिका बिभित्सा वा रु
द्रस्य जगतः शेषे विभाषा स्त्रीप्रत्यय इत्येके विचित्रा जगतः कृतिर्हरेर्हरिणा वा केचिदविशेषेण विभाषां शब्दानामनुशास ×मिच्छंति×
नमाचार्याणामाचार्यस्य वा क्तस्य च वर्तमाने वर्तमानार्थक्तस्य योगे षष्ठी स्यात् न लोकेति निषेधस्यापवादः राज्ञां मतः बुद्धः पू
जितो वा अधिकरणवाचिनश्च क्तस्य योगे षष्ठी इदमेषामासितं न लोकाव्ययनिष्ठाखलर्थतृनां एषां प्रयोगे षष्ठी न लादेशाः कु
र्वन् कुर्वाणो वा सृष्टिं हरिः उ हरिं दिदृक्षुः अलंकरिष्णुर्वा उक दैत्यान् घातुको हरिः कमेरनिषेधः लक्ष्म्याः कामुकः अव्ययं ज
गत्सृष्ट्वा सुखं कर्तुं निष्ठा दैत्यान् हतवान् विष्णुः हतो दैत्याः खलर्थः ईषत्करः प्रपंचो हरिणा तृन्निति प्रत्याहारः शानन्चानश

विशिष्टज्ञानाद्यादौ स्त्यह्नो कारा द्व्यालन्न सोमं पवमानः सोमन्नर आत्मानं मंस्यमानः आत्मवेदमधीयन्न् हन्नत्कर्मेलोकान् द्विष
ःअवधीत्सुरसान्सुरेवा द्विषन् सर्वोऽपि कारकः षष्ठ्याः प्रतिषेधः शेषषष्ठी तु स्यादेव ब्राह्मणस्य कुर्वन् नरकस्य जिष्णुः अकेनोर्भवि
ष्यदाधमर्ण्ययोः भविष्यत्यकस्य तद्विषयादाधमर्ण्यार्थेनप्रत्ययेन योगे षष्ठी न स्यात् सतः पालको व्रजति ग्रामं गामी शतं दायी कृत्या
नां कर्तरि वा षष्ठी स्यात् मया मम वा सेव्यो हरिः कर्तरि इति किं गेयो माणवकः साम्नां तव्यगोऽपि ति कर्तरि विद्विधानादनिर्दिष्टे क
र्मण्यत्र योगो विभज्यते कृत्यानां उभयप्राप्तौ विशिनेति वानुवर्तते नेमित्यव्यां [illegible] सं गावः कृत्स्ने न तस्य कर्तरि वा उक्तेर्थे तु
ल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां तुल्यार्थैर्योगे तृतीया वा स्यात् तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा अतुलोपमाभ्यां
किं तुला उपमा वा कृष्णस्य नास्ति चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः एतदर्थैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी
आयुष्यं चिरंजीवितं कृष्णाय कृष्णस्य वा भूयात् एवं मद्रं भद्रं कुशलं निरामयं सुखं शं अर्थः प्रयोजनं हितं पथ्यं भूयात् आ
शिषि किं देवदत्तस्यायुष्यमस्ति व्याख्यानात्सर्वत्रार्थग्रहणं मद्रभद्रयोः पर्यायत्वादन्यतरोनपठनीयः आधारोऽधिकरणं
कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात् सप्तम्यधिकरणे च अधिकरणे सप्तमी स्याद् दूरान्तिका
र्थेभ्यश्च पक्षे औपश्लेषिको वैषयिको अभिव्यापकश्चेत्याधारस्त्रिधा कटे आस्ते स्थाल्यां पचति मोक्षे इच्छास्ति सर्वस्मिन्नात्मास्ति वनस्य दूरे
अन्तिके वा दूरान्तिकार्थेभ्य इति विभक्तित्रयेण सह चतस्रोत्र विभक्तयः फलिताः क्तस्येन्विषयस्य कर्मण्युपसंख्यानं अधीती ३०
व्याकरणे अधीतमनेनेति विग्रहे इष्टादिभ्यश्चेति कर्तरि इनिः निमित्तात् कर्मयोगे निमित्तमिह फलं योगः संयोगसमवायात्मक
ःचर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरं केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः हेतुतृतीयात्र प्राप्ता सीमाण्डकोशः पुष्क
लको गन्धमृगः योगविशेषे किं वेतनेन धान्यं लुनाति यस्य च भावेन भावलक्षणं यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्त

मीस्याद्गोषु दुह्यमानासु गतः साधुसाधुप्रयोगे च साधुः कृष्णो मातरि असाधुर्मातुले अर्हाणां कर्तृत्वे अनर्हाणामकर्तृत्वे
तद्वैपरीत्ये च सत्सु तरत्सु असंत आसते असत्सु तिष्ठत्सु संतस्तरंति सत्सु तिष्ठत्सु असंतस्तरंति असत्सु तरत्सु संतस्तिष्ठंति षष्ठी
चानादरे अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः रुदति रुदतो वा प्राव्राजीत् रुदंतं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः
स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनं
गवां गोषु वा स्वामी गवां गोषु वा प्रसूतः गा एवानुभवितुं जात इत्यर्थः आयुक्तकुशलाभ्यां चासेवायां आभ्यां योगे षष्ठीसप्तम्यौ
स्तः तात्पर्ये आयुक्तो व्यापारितः आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा आसेवायां किं आयुक्तो गौः शकटे ईषद्युक्त इत्
यर्थः यतश्च निर्धारणं जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः नृणां
नृषु वा ब्राह्मणः श्रेष्ठः गवां गोषु वा कृष्णा गौर्बहुक्षीरा गच्छतां गच्छत्सु वा धावन् शीघ्रः छात्राणां छात्रेषु वा मैत्रः पटुः पंचमी विभ
क्ते विभागो विभक्तं निर्धार्यमाणस्य यत्र भेद एव तत्र पंचमी स्यात् माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः साधुनिपुणाभ्यामर्
चायां सप्तम्यप्रतेः आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे मातरि साधुर्निपुणो वा अर्चायां किं निपुणो राज्ञो भृत्य
: इह तत्त्वकथने तात्पर्यं अप्रत्यादिभिरिति वक्तव्यं साधुर्निपुणो वा मातरं प्रति परि अनु वा प्रसितोत्सुकाभ्यां तृतीया च आ
भ्यां योगे तृतीया स्यात् चात्सप्तमी प्रसितः उत्सुको वा हरिणा हरौ वा नक्षत्रे च लुपि नक्षत्रे प्रकृत्यर्थे यः लुप्संज्ञया लुप्य
मानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात् तृतीयासप्तम्यौ स्तः अधिकरणे मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् मूले श्रवणे इति
वा लुपि किं पुष्ये शनिः सप्तमीपंचम्यौ कारकमध्ये शक्तिमध्ये यौ कालाध्वनौ ताभ्यामेते स्तः अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भो
क्ता कर्तृशक्त्योर्मध्ये यं कालः इहस्थोयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत् कर्तृकर्मशक्त्योर्मध्ये देशः अधिककर्मप्रवचनीययोगे सप्त

मीपंचम्याविधेतितदस्मिन्नधिकमितियस्मादधिकंयस्यचनिर्देशात् लोकेलोकाद्वाधिकोहरिः अधिरीश्वरेस्वस्वामिसंबंधे
ऽधिःकर्मप्रवचनीयसंज्ञः यस्मादधिकंयस्यचेश्वरवचनंतत्रसप्तमी अत्रकर्मप्रवचनीययुक्तेसप्तमीस्यात् उपपरार्द्धे
हरेर्गुणाः परार्द्धादधिकाइत्यर्थः ईश्वरेतुस्वस्वामित्वापर्यायेणसप्तमी अधिभुविरामः अधिरामेभूः सप्तमीशौण्डैरितिसमासप
क्षेतुरामाधीना अषडक्षेत्यादिनाखः विभाषाकृञि अधिकरोतिर्यंप्राकंशोस्यादीश्वरेदृ यदत्रमाममधिकरिष्यतिविनियो
क्तइत्यर्थः इहविनियोक्तुरीश्वरत्वंगम्यते अगतित्वान्निडिवोदात्तवतीतिनिघातोन **॥इतिविभक्त्यर्थाः॥** समर्थःपदविधिः
पदसंबंधीयोविधिःससमर्थाश्रितोबोध्यः प्राक्कडारात्समासः कडाराःकर्मधारयइत्यतःप्राक्समासइत्यधिक्रिय
तेसहसुपासहेतियोगोविभज्यतेसुबंतंसमर्थेनसमस्यतेयोगविभागस्येष्टसिद्ध्यर्थत्वात्कचित्पद्यतिङोपरपदोयंसमास
सवक्षेदस्येवपर्यभूषत अनुव्यचलत् सुपासुप्सुपासहसमस्यतेसमासत्वात्प्रातिपदिकत्वं सुपोधातुप्रातिपदिकयोः ए
तयोरवयवस्यसुपोलुक्स्यात् भूतपूर्वेचरडितिनिर्देशात्पूर्वनिपातः पूर्वंभूतोभूतपूर्वः इवेनसमासोविभक्त्यलोपश्च।
जीमूतस्येव अव्ययीभावः अधिकारोयं अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चा
द्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु अव्ययमितियोगोविभज्यते अव्ययंसमस्यतेसोऽव्ययीभावः प्र
थमानिर्दिष्टंसमासउपसर्जनं समासशास्त्रेप्रथमानिर्दिष्टमुपसर्जनसंज्ञंस्यात् उपसर्जनंपूर्वं समासउपसर्जनंप्राक्प्र
योज्यं एकविभक्तिचापूर्वनिपाते विग्रहेयन्नियतविभक्तिकं तदुपसर्जनंस्यात् नतुतस्यपूर्वनिपातः गोस्त्रियोरुपसर्ज
नस्य उपसर्जनंयोगोस्त्रीप्रत्ययांतंचतदंतस्यप्रातिपदिकस्यह्रस्वःस्यात् अव्ययीभावश्च स्यादंतं नाव्ययीभावाद
त्वपंचम्याः अदंतादव्ययीभावात्सुपोनलुक् तस्यपंचमींविनाअमादेशः दिक्षादोर्मध्यमपदिशंक्षीवाव्ययंत्रपदिशंदि

शोर्मध्यं विदिक् स्त्रियामित्यमरः । तृतीयासप्तम्योर्बहुलं । अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलममभावः स्यात् । अपदि-
शं अपदिशेन अपदिशे बहुलग्रहणात्सुमद्रमुन्मत्तगंगमित्यादौ सप्तम्या नित्यममभावः ॥ विभक्तौ स्यादेतन्मतं । वि-
भक्त्यर्थादिषु वर्त्तमानमव्ययं सुबंतेन सह समस्यते सोऽव्ययीभावः । विभक्तौ तावत् हरौ इत्यधिहरि । सप्तम्यर्थस्यैवात्र द्योतको-
ऽधिः । हरि ङि अधि इत्यलौकिकविग्रहवाक्यं अत्र निपातेनास्ति इति व्यधिकरणे वचनसामर्थ्यात्समी अव्ययीभावश्च अव्ययसं-
ज्ञकं स्यात् । ह्रस्वो नपुंसके प्रातिपदिकस्य । गोपायतीति गाः पातीति वा गोपाः तस्मिन्नधिगोपं समीपे कृष्णस्य समीपमुपकृष्णं +अधि+
समया ग्रामं निकषा लंकां आराद्वनादित्यत्र नाव्ययीभावः अभितः परितः अन्यारादितीति द्वितीयापंचम्योर्विधानसामर्थ्या-
न्मद्राणां समृद्धिः सुमद्रं यवनानां व्यृद्धिर्दुर्यवनं विगता ऋद्धिः व्यृद्धिः मक्षिकाणामभावो निर्मक्षिकं हिमस्यात्ययो ऽतिहि-
मं अत्ययो ध्वंसः निद्रा संप्रति न युज्यत इत्यतिनिद्रं हरिशब्दस्य प्रकाश इति हरि विष्णोः पश्चादनुविष्णु पश्चाद्रथस्य नाद्यस-
मासः ततः पश्चाच्छब्दस्य तद्वृत्तिसाध्यप्रयोगात् योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः अनुरूपं रूपस्य योग्य-
मित्यर्थः अर्थमर्थं प्रति प्रत्यर्थं प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयत्वविधानसामर्थ्याद्विग्रहे द्वितीयायां तद्वाक्यमपि शक्तिं
मनतिक्रम्य यथाशक्ति हरेः सादृश्यं सहरि वक्ष्यमाणेन सहस्य सः ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं चक्रेण युगपदिति
विग्रहे अव्ययीभावे चाकाले सहस्य सः स्यात्तु कालेऽपि चक्रं कालेऽपि सदृश सदृशः सख्याः ससखि यथार्थत्वेनैव सि-
द्धे सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये यथा स्यादित्येवमर्थं क्षत्राणां संपत्तिः सक्षत्रं ऋद्धेराधिक्यं समृद्धिः अनुरूप आत्मभा-
वः संपत्तिरिति भेदः तृणमप्यपरित्यज्य सतृणमत्ति साकल्येनेत्यर्थः ननु अत्र तृणानन्तर्गणेनान्वयात् अंते अग्निग्रन्थपर्यंतमधी-
ते साग्नि यथाऽसादृश्ये । असादृश्य एवाव्ययं यथाशब्दः समस्यते तेनेदं न यथा हरिस्तथा हरः हरेरुपमानत्वं यथाशब्दो द्योतयति

+पं+ उपं+

तेन साहत्यपहृति वाङिति वोद्धार्थे आसंनिषिध्यते यावदवधारणे यावंतः श्लोकास्तावंतोऽच्युतप्रणामाः यावच्छ्लोकं अच्युतप्रा
णिनामात्रार्थे शाकस्य लेशः शाकप्रति मात्रार्थे किं वृक्षं प्रति विद्योतते विद्युत् अक्षशलाकासंख्याः परिणा द्यूतव्यवहा
रे पराजये एवायं समासः अक्षेण विपरीतं वृत्तं अक्षपरि शलाकापरि एकपरि विभाषा अधिकारोऽयं एतत् आसमाप्तेर्विभा
षा नाम नित्यसमासत्वं सुप्सुपेति विभाषा नित्यसमासः अव्ययमित्यादिना समासविधानात् ज्ञापकात् अपपरिबहिरंचवः
पंचम्याः अपविष्णु संसारः अपविष्णोः परिविष्णु परिविष्णोः बहिर्वनं बहिर्वनात् प्राग्वनं प्राग्वनात् आङ् मर्यादाभिवि
ध्योः एतयोराङ् पंचम्यंतेन वा समस्यते सोऽव्ययीभावः आमुक्तेः संसारः आमुक्तेः आबालं हरिभक्तिः आबालेभ्यः लक्षणे
नाभिप्रती आभिमुख्ये आभिमुख्यद्योतकावभिप्रती विकल्पेनाविना सह प्राग्वत् अभ्यग्निं शलभाः पतंति अग्निमभिप्रत्य
ग्नि अग्निं प्रति अनुर्यत्समया येन पदार्थसमयास्तेन लक्षणभूतेनानुः समस्यते सोऽव्ययीभावः अनुवनमशनिर्गतः वन
स्य समीपं गत इत्यर्थः यस्य चायामः यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते अनुगंगं वाराणसी गंगा
या अनु गंगाया दैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः तिष्ठद्गुप्रभृतीनि च एतानि निपात्यंते तिष्ठंति गावो यस्मिन् काले स तिष्ठद्गु
दोहनकालः आयतीगवं इत्यादयः इत्यादेशाः ध्रुवञ्चावविरहः समासांतश्च निपात्यते इत्यादि पारे मध्ये षष्ठ्या वा पारमध्यशब्दौ
षष्ठ्यंतेन सह वा समस्येते एदंतत्वं चानयोर्निपात्यते पक्षे षष्ठीतत्पुरुषः पारेगंगात् आनय गंगापारात् मध्येगंगात् गंगामध्या ३८
त् महाविकल्पेन वा कथमपि गंगायाः पारात् गंगाया मध्यात् संख्या वंश्येन वंश्यो द्विविधः विद्यया जन्मना वा तत्र सर्वो वं
श्यः तद्वाचिना संख्या वा समस्यते द्वौ मुनी वंश्यौ द्विमुनि व्याकरणस्य त्रिमुनि विद्या तद्वता भेदविवक्षायां त्रिमुनि व्याकर
णं एकविंशति भारद्वाजं नदीभिश्च नदीभिः संख्या प्राग्वत् समाहारे चायमिष्यते सप्तगंगं द्वियमुनं अन्यपदार्थे च संज्ञा

वा अन्यपदार्थे विद्यमानं सुबंतं नदीभिः सह नित्यं समस्यते संज्ञायां विनापाधिकारे ऽपि वाक्येन संज्ञानवगमादिह नित्यसमा
सः उन्मत्तगंगं लोहितगंगं नाम देशः समासांताः इत्यधिकृत्य अव्ययीभावे शरत्प्रभृतिभ्यः शरदादिभ्यः टच् स्यात् समासां
ते ऽव्ययीभावे शरदः समीपं उपशरदं प्रतिविपाशं शरद् विपाश् अनस् मनस् उपानह् दिव् हिमवत् अनडुह् दृश् दि
शा चेतस् चतुर् त्यद् तद् यद् कियत् जराया जरस् च उपजरसं प्रतिपरसमनुभ्योऽक्ष्णः यस्येति च प्रत्यक्षं अक्ष्णः परमिति विग्रहे
समासांतविधानसामर्थ्यादव्ययीभावः परोक्षे लिटि निपातनात्परस्यौकारादेशः परोक्षं परोक्षा क्रियेत्यादिवर्ज्ज्याध्यवि
समक्षं अन्वक्षं अनश्च अन्नंतादव्ययीभावाट्टच् स्यात् नस्तद्धिते नांतस्य भस्य टेर्लोपः स्यात्तद्धिते उपराजं अध्यात्मं नपुंसकादन्य
तरस्यां अन्नंतं यत्क्लीबं तदंतादव्ययीभावाट्टज्वा उपचर्मं उपचर्म नदीपौर्णमास्याग्रहायणीभ्यः वा टच् उपनदं उपनदि उ
पपौर्णमासं उपपौर्णमासि झयः झयंतादव्ययीभावाट्टज्वा उपसमिधं उपसमित् गिरेश्च सेनकस्य गिर्यंतादव्ययीभावाट्ट
ज्वा सेनकमते उपगिरं उपगिरि इत्यव्ययीभावः तत्पुरुषः अधिकारोयं प्राग्बहुव्रीहेः द्विगुश्च द्विगुरपि तत्पुरु
षसंज्ञः स्यात् इदं सूत्रं त्यक्तुं शक्यं संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञासमावेशस्य सुवचत्वात् समासांतप्रयो
जनं पंचराजं द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयांतं श्रितादिप्रकृतिकैः सुबंतैः सह समस्यते वा स तत्पु
रुषः कृष्णं श्रितः कृष्णश्रितः दुःखातीतः गम्यादीनामुपसंख्यानं ग्रामं गमी ग्रामगमी अन्नं बुभुक्षुः अन्नबुभुक्षुः स्वयं क्तेन द्वितीयेति
न संबध्यते ऽयोग्यत्वात् स्वयंकृतस्यापत्यं स्वायंकृतिः खट्वा क्षेपे खट्वाप्रकृतिकं द्वितीयांतं क्तांतप्रकृतिकेन सुबंतेन समस्य
ते निंदायां खट्वारूढो जाल्मः नित्यसमासोऽयं न हि वाक्येन निंदा गम्यते सामि सामिकृतं कालाः क्तेनेत्येव अनत्यंतसंयोगा
र्थं वचनं मासप्रमितः प्रतिपच्चंद्रः मासं परिच्छेत्तुं आरब्धवान् अत्यंतसंयोगे च कालाः इत्येव अक्तांतार्थं वचनं मुहूर्तसुखं

गुरूर्त्तस्तु खं तृतीया. तत्कृतार्थेन गुणवचनेन तत्कृतेन गुणस्तृतीयकं तृतीयांतं तृतीयार्थकृतगुणवचनेनार्थशब्देन च
सह प्राग्वत् शंकुलया खंडः शंकुलाखंडः धान्येनार्थो धान्यार्थः तत्कृते किं अक्ष्णा काणः पूर्वसदृशसमोनार्थकलहनिपु
णमिश्रश्लक्ष्णैः तृतीयांतमेतैः प्राग्वत् मासपूर्वः मातृसदृशः पितृसमः ऊनार्थः माषोनं कार्षापणं माषविकलं वा कलह
: आचारनिपुणः गुडमिश्रः आचारश्लक्ष्णः मिश्रग्रहणे सोपसर्गस्यापि ग्रहणं मिश्रं चानुपसर्गमसंधौ इत्यत्रानुपसर्गग्रह
णात् गुडसंमिश्राः धानाः अवरस्योपसंख्यानं मासेनावरो मासावरः कर्तृकरणे कृता बहुलं कर्तरि करणे च तृतीयाव
कृतं प्राग्वत् हरिणा त्रातो हरित्रातः नखैर्भिन्नो नखभिन्नः कर्तृकरणे गतिकारकपूर्वस्यापि ग्रहणं नखनिर्भिन्नः कृता किं
काष्ठैः पचतितरां कृत्यैरधिकार्थवचने स्तुतिनिंदाफलकमर्थवादवचनमधिकार्थवचनं तत्र कर्तरि करणे च तृतीयांतं कृत्यै
: सह प्राग्वत् काकपेया नदी वातच्छेद्यं तृणं अन्नेन व्यंजनं संस्कारकद्रव्यवाचकं तृतीयांतमन्नेन प्राग्वत् दध्ना उदनो द
ध्योदनः इदं तत्रैकोपसेकक्रियाद्वारा सामर्थ्यं तत्केण मिश्रीकरणं गुडेन धानाः गुडधानाः मिश्रणक्रियाद्वारा सामर्थ्यं
चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यंतार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यंतं वा प्राग्वत् तदर्थेन प्रकृतिविकृति
तावेव बलिरक्षितग्रहणात् ज्ञापकात् यूपाय दारु यूपदारु नेह रंधनाय स्थाली अश्वघासादयस्तु षष्ठीसमासः अर्थेन
नित्यसमासो विशेष्यलिंगता चेति वक्तव्यं द्विजायायं द्विजार्थः सूपः द्विजार्था यवागूः द्विजार्थं पयः भूतबलिः गोहितं गोसु ४०
खं गोरक्षितं पंचमी भयेन चोराद्भयं चोरभयं भयभीतभीतिभीभिरिति वाच्यं वृकभीतः अपेतापोढमुक्तपतितापत्रस्तैरल्पशः
एतैः सह अल्पं पंचम्यंतं समस्यते सततस्तुकृषः सुखापेतः कल्पनापोढः चक्रमुक्तः स्वर्गपतितः तरंगापत्रस्तः अल्पशः किं प्रा
सादात्पतितः स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन स्तोकान्मुक्तः अल्पान्मुक्तः अंतिकादागतः अभ्याशादागतः दूरादागतः विप्र

कस्मादागतः कुतश्चादागतः पंचम्यास्तोकादिभ्य इत्यलुक् षष्ठी राज्ञः पुरुषो राजपुरुषः याजकादिभिश्च वृत्तिः षष्ठ्यंतं समस्यते तृजका
काभ्यां कर्त्तरीत्यस्य प्रतिप्रसवोऽयं ब्राह्मणयाजकः देवपूजकः गुणोत्तरेण तरलोपश्चेति लोपश्चेति वक्तव्यं तरबंतं यद्गुणवाचि
तेन समासः न निर्द्धारणे इति पूरणगुणेति च प्रतिषेधस्य प्रतिप्रसवोऽयं सर्वेषां श्वेततरः सर्वश्वेतः सर्वेषां महत्तरः सर्वमहान्
कृद्योगा च षष्ठी समस्यत इति वाच्यं इध्मव्रश्चनः न निर्द्धारणे निर्द्धारणे या षष्ठी सा न समस्यते नृणां द्विजः श्रेष्ठः प्रतिपदविधाना
षष्ठी न समस्यते इति वाच्यं सर्पिषो ज्ञानं पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन पूरणाद्यर्थैः सदादिभिश्च षष्ठी
न समस्यते पूरणे सतां षष्ठः गुणः काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्लाः यदा प्रकरणादिना दंता इति विशेष्यं ज्ञातं तदेदमुदाह
गुणेन॥ रणं अनित्योऽयं गुणेन निषेधः संज्ञाप्रमाणत्वात् इत्यादि निर्देशात् तेनार्थगौरवं बुद्धिमांद्यमित्यादि सिद्धं सुहितार्थास्तृप्त्यर्थाः फला
नां सुहितः तृतीयासमासस्तु स्यादेव स्वरे विशेषः सत् द्विजस्य कुर्वन् कुर्वाणो वा किंकर इत्यर्थः अव्ययं ब्राह्मणस्य कृत्वा पूर्वो
त्तरसाहचर्यात् कृदव्ययमेव गृह्यते तेन तदुपरीत्यादि सिद्धमिति रक्षितः तव्यः ब्राह्मणस्य कर्त्तव्यं तव्यता तु भवत्येव स्वकर्त्त
स॰ व्यं स्वरे तु भेदः समानाधिकरणे तक्षकस्य सर्पस्य विशेषणसमासस्तु बहुलग्रहणान्न गोर्धेनोरित्यादि पोटायुवतीत्यादी
नां विरुद्धं तरेषु व्यतायीनां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोऽप्यनेन वार्यते क्तेन च पूजायां मतिबुद्धिपूजार्थेभ्यश्च इति विहितो यः
क्तस्तदंतेन षष्ठी न समस्यते राज्ञां मतः बुद्धः पूजितो वा राजपूजित इत्यादौ तु भूते क्तांतेन सह तृतीयांतस्य समासः अधि
करणवाचिना च क्तेन षष्ठी न समस्यते इदमेषामासितं गतं भुक्तं वा कर्मणि च उभयप्राप्तौ कर्मणीति या षष्ठी सा न समस्य
ते आश्चर्यो गवां दोहो गोपेन तृजकाभ्यां कर्त्तरि कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः अपां स्रष्टा वज्रस्य भर्त्ता ओदनस्य पा
चकः कर्त्तरि किं इक्षूणां भक्षणमिक्षुभक्षिका पत्यर्थभर्त्तृशब्दस्य याजकादित्वात्समासः तत्स्थैश्च गुणैः षष्ठ्यां तं नि

ज्ञो विदर्थस्य कर्मणि... गर्हीदयेषा करे लिहृत्य: प्रतियत्नेच ... विना प्रयुज्यमाने ... इत्यादि ... समर्थयोः ... ण॥

मत्रिस्त्रिभुवनविधातुश्च कलह इति शेषषष्ठ्या समास इति कैयटः कर्तरि च कर्तृषष्ठ्या अकेन न समस्यते तत्त्वतः आशि
काने हट्ट ड●तुवर्तते तद्योगे कर्तरि विहितत्वेन कर्तृषष्ठ्या अकेन सा वा तु नित्यं क्रीडाजीवकयोः एतयोरर्थयोरकेन नित्यं ष
ष्ठी समस्यते उद्दालकपुष्पभंजिका क्रीडाविशेषस्य संज्ञा संज्ञायामिति स्त्रीभावे ण्वुल् जीविकायां दन्तलेखकः तत्र क्रीडा
यां विकल्पे जीविकायां तृजकाभ्यां कर्तरीति निषेधप्राप्ते वचनं पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे अवयविना स
ह पूर्वादयः समस्यंते एकत्वसंख्याविशिष्टश्चेदवयवी षष्ठीसमासापवादः पूर्वं कायस्य पूर्वकायः अपरकायः एकदे
शिना किं पूर्वं नाभेः कायस्य एकाधिकरणे किं पूर्वं छात्राणां सर्वोप्येकदेशोह्ना समस्यते संख्याविसायेति ज्ञापकात्
मध्याह्नः सायाह्नः केचित्तु सर्व एकदेशः कालेन समस्यते न त्वह्नैव ज्ञापकस्य सामान्यापेक्षकत्वात् तेन मध्यरात्रः उपार
रात्रः पश्चिमरात्रः गोष्ठरात्र इत्यादि सिद्धमित्याहुः अर्धं नपुंसकं समांशवाची अर्धशब्दो नित्यं क्लीबे स प्राग्वत् एकविभक्तावषष्ठ्यं
तवचनं एकदेशिसमासविषये षष्ठ्युपसर्जनसंज्ञानिषेधः तेन पंचखट्वीत्यादि सिद्ध्यति अर्धं पिप्पल्या अर्धपिप्पली
क्लीबे किं ग्रामार्धः द्रव्यैक्य एव अर्धं पिप्पलीनां द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां एतान्येकदेशिना सह प्राग्वद्वा द्वि
तीयं भिक्षाया द्वितीयभिक्षा एकदेशिना किं द्वितीयं भिक्षायाः भिक्षुकस्य अन्यतरस्यांग्रहणसामर्थ्यात् पूरणगुणेति निषेधं बा
धित्वा पक्षे षष्ठीसमासः भिक्षाद्वितीयं प्राप्तापन्ने च द्वितीयया पक्षे द्वितीयाश्रितेति समासः प्राप्तो जीविकां प्राप्तजीविकः जीवि ५१
कां प्राप्तः आपन्नजीविकः जीविकापन्नः इह सूत्रे द्वितीया अ इति छित्त्वा अकारोपि विधीयते तेन जीविकां प्राप्ता स्त्री प्राप्ता जी
विका आपन्नजीविका कालाः परिमाणिना परिच्छेद्यवाचिना सुबंतेन सह कालाः समस्यंते मासो जातं यस्य स मासजातः
द्व्यहजातः द्वयोरह्नोः समाहारो द्व्यहः द्व्यहो जातस्येति विग्रहः उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसं

ख्यानं च अदनीज्ञातस्य यस्य चकज्ञातः अक्षोंशं इति वक्ष्यमाणेणकादेशः पूर्वत्र तु न संख्यादेः समाहार इति निषेधः सप्तमी
शौण्डैः सप्तम्यंतं शौण्डादिभिः प्राग्वत् अक्षेषु शौण्डः अक्षशौण्डः अधिशब्दोऽत्र पठ्यते अध्युत्तरपदादिति खः ईश्वराधीनः सिद्ध
शुष्कपक्वबंधैश्च एतैः सप्तमी प्राग्वत् सांकाश्यसिद्धः आतपशुष्कः स्थालीपक्वः चक्रबंधः ध्वांक्षेण क्षेपे ध्वांक्षेण सह सप्त
म्यंतं प्राग्वत् तीर्थध्वांक्ष इव तीर्थध्वांक्षः तीर्थकाकः कृत्यैर्ऋणे सप्तम्यंतं कृत्यप्रत्ययांतैः सह प्राग्वत् आवश्यके मासदेयमृ
णं पूर्वाह्णेगेयं साम संज्ञायां सप्तम्यंतं सुपा प्राग्वत् संज्ञायां वाक्येन संज्ञानवगमात् नित्यसमासोयं अरण्येतिलकाः वनेकसेरु
काः क्तेनाहोरात्रावयवाः अह्नो रात्रेश्चावयवाः सप्तम्यंताः क्तांतेन सह प्राग्वत् पूर्वाह्णकृतं अपररात्रकृतं अवयवग्रहणात्किं
अह्नि दृष्टं तत्र तत्रेत्येतत्सप्तम्यंतं क्तांतेन सह प्राग्वत् तत्रभुक्तं क्षेपे सप्तम्यंतं क्तांतेन प्राग्वत् निंदायां अवतप्तेनकुलस्थितं
मेतत् पात्रेसमितादयश्च एते निपात्यंते क्षेपे पात्रेसमिताः भोजनसमय एव संगता न तु कार्ये गेहेशूरः गेहेनर्दी आकृतिग
णोयं चकारोवधारणार्थः तेनैषां समासांतरे घटकतया प्रवेशो न पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकर
णेन पूर्वकालिकवचनमपरकालिकवचनेन समानाधिकरणेन एकादयश्च सप्तम्यंते विशेषणं विशेष्येणेति सिद्धे पूर्व
निपातार्थं नियमार्थं सूत्रं एकशब्दस्य दिक्संख्ये संज्ञायामिति नियमार्थं पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः एक बोधना×
नाथः सर्वयाज्ञिकाः जरन्नैयायिकाः पुराणमीमांसकाः नवपाठकाः केवलवैयाकरणाः दिक्संख्ये संज्ञायां समानाधिक
रणेनेत्यापादपरिसमाप्तेरधिकारः संज्ञायामेवेति नियमार्थं सूत्रं पूर्वेषुकामशमी सप्तर्षयः नेह उत्तरा वृक्षाः पंच ब्राह्मणाः
तद्धितार्थोत्तरपदसमाहारे च तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत् पूर्वस्यां शालायां भवः
पौर्वशालः समासे कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः आपरशालः पूर्वाशाला प्रियायस्य

बहु

स्यतिद्विपदे [बहु]व्रीहौ कृते द्वियानाद्वि उत्तरपदे द्वयोस्तत्पुरुषः तेनानाज्ञाद्वे आकार उदात्तः सर्वनाम्नां द्वियः दिक्षु समा
हारे नास्यनत्तिक्षुनात् संख्यायास्तद्धितार्थे बहं भामाद्रणाम पत्यं षाण्मातुरः पंचगावो धनं यस्येति त्रिपदे बहुव्रीहावंतरत
त्पुरुषस्य विकल्पेप्राप्ते द्वंद्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनं गो.. रतद्धितलुकि गोतातत्पुरुषादक्ष्याःसमासांतो नत्वे त
द्धितलुकि पंचगवधनः पंचानां गवां समाहारः संख्यापूर्वो द्विगुः तद्धितार्थे लिंप्रोक्तः संख्यापूर्वो द्विगुः स्यात् द्विगुरेकवचनं द्वि
गुर्थः समाहार एकवत् स नपुंसकमिति नपुंसकत्वं पंचगवं कुत्सितानि कुत्सनैः कुत्स्यमानानि कुत्सनैः सह प्राग्वत् वैयाक
रणखसूचिः मीमांसककुर्दुरूढः पापाणके कुत्सितैः पूर्वसूत्रापवादः पापनापितः अणकक्कुलालः उपमानानि सामान्य
वचनैः घनश्यामः इह पूर्वपदं तत्साहचर्येला क्षणिकमिति सवपिउलोकिकविग्रहे इववचनाद्धः प्रयुज्यते पूर्वनिपातनि
यमार्थं सूत्रं उपमितं व्याघ्रादिभिः सामान्याप्रयोगे उपमेयं व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्य प्रयोगेः सति विशेष्य
स्य पूर्वनिपातार्थं सूत्रं पुरुषव्याघ्रः नृसोमः व्याघ्रादिराकृतिगणः सामान्याप्रयोगे किं पुरुषो व्याघ्र इव शूरः विशेषणं विशे
ष्येण बहुलं तेदकं समानाधिकरणेन तेन बहुलं प्राग्वत् नीलमुत्पलं नीलोत्पलं बहुलग्रहणात् क्वचिन्नित्यं कृष्णसर्पः
क्वचिन्न रामो जामदग्न्यः पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च पूर्वनिपातनियमार्थमिदं पूर्ववैयाकरणः
अपराध्यापकः अपरस्यादेपश्चाभावो वक्तव्यः अपरश्चासौ वर्द्धश्च पश्चार्द्धः कथमेकवीर इति पूर्वकालिकेति बाधित्वा परत्वाद ४२
नेन समासे वीरैक इति स्यात् बाहुलकात् भविष्यति अल्पाच्तरः कृतादिभिः अल्पादि शुद्ध पूर्ववचनेकत्वं अश्रेणयः श्रेणयः
कृताः श्रेणीकृताः केननञ्विशिष्टेनानञ् कृतं च तदकृतं च कृताकृतं शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसं
ख्यानं शाकप्रियः पार्थिवः शाकपार्थिवः देवब्राह्मणः सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः सद्वैद्यः वक्ष्यमाणेन महत

× किंराजा ×

आकारः महावैयाकरणः पूज्यमानैः किं उत्कृष्टो गोः पंकाद्धृत इत्यर्थः वृंदारकनागकुंजरैः पूज्यमानं गोवृंदारकः व्याघ्रादे
राकृतिगणत्वादेवसिद्धे सामान्यप्रयोगाभावे वचनं कतरकतमौ जातिपरिप्रश्ने कतरकठः कतमकलापः गोत्रं च चरणैः सहेति
जातित्वं किं क्षेपे कुत्सितो राजा यो न रक्षति पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्या
पकधूर्तैर्जातिः वस्तुरूपः समानाधिकरणः कर्मधारयः पुंवत्कर्मधारयजातीयदेशीयेषु कर्मधारये जातीयदेशीययो
श्च परतो भाषितपुंस्कात्परऊङभावोऽस्मिन् तथाभूतं रूपं पुंवत् पूरणीप्रियादिष्वप्राप्तं पुंवद्भावो विधीयते महानवमी कृ
ष्णचतुर्दशी महाप्रिया तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते पाचकस्त्री दत्तभार्या पंचमभार्या
स्त्रीघृताची सुकेशाताची ब्राह्मणभार्या एवं पाचकजातीया पाचकदेशीया इत्यादि इत्यपोटा पोटा स्त्रीपुंसलक्षणा इत्यायु
वतिः अपिस्तोकः उदश्विकतिपयं गृष्टिस्सकृत्प्रसूता गोगृष्टिः धेनुर्नवसूतिका गोधेनुः वशा वंध्या गोवशा वेहद्गर्भघाति
नी गोवेहत् बष्कयणी तरुणवत्सा गोबष्कयणी कठप्रवक्ता कठश्रोत्रियः कठाध्यापकः कठधूर्तः प्रशंसावचनैश्च एतैः
संहजातिः प्राग्वत् गोमतल्लिका गोमचर्चिका गोप्रकांडं गवोद्धः गोतल्लजः प्रशस्ता गौरित्यर्थः मतल्लिकादयो नियतलिं
गाः नतु विशेष्यनिघ्नाः जातिः किं कुमारी मतल्लिका युवाखलतिपलितवलिनजरतीभिः एवं निपातनियमार्थमत्र लिं
गविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते युवा खलतिः युवखलतिः युवतिः खलती युवखलती कुवत्यामेव जरतीध
मेयिलंसेन तद्धर्मारोपात् सामानाधिकरण्यं कृत्यतुल्याख्या अजात्या भोज्योष्णं तुल्यश्वेतः सदृशश्वेतः अजात्या किं भोज्य उ
दनः प्रतिषेधसामर्थ्यात् द्वितीयेन समासोऽपि न वर्णो वर्णेन समानाधिकरणेन सह प्राग्वत् कृष्णसारंगः कडाराः कर्मधारये क
डारादयः अष्टौ कर्मधारये वा पूर्वं प्रयोज्याः कडारजैमिनिः जैमिनिकडारः कुमारः श्रमणादिभिः कुमारी श्रमणा कुमारश्रमणा

इह गणे अमणप्रभृतिनागलिंगात्यादयः स्त्रीलिंगाः पठ्यंते लिंगविशिष्टपरिभाषया आप्वदेवक्षापकं बोध्यं चतुष्पादोगलि
ष्यावतुष्पाद्भ्याक्षातिवाविनोगलिंगी ज्ञाङ्टेन सह पाप्वत गोगलिंगी मयूरव्यंसकादयश्च एते निपात्यंते मयूरो व्यंसको मयू
रव्यंसकः व्यंसको धूर्तः उदक्च अवाक्च उच्चावचं निश्चितं प्रचितं निश्च प्रचं नास्ति किंचन यस्याः किंचनः आख्यातमाख्या
तेन क्रियासातत्ये अश्नीतपिबतेत्येवसततं यत्र अभिधीयते सा अश्नीतपिबता पचतभृज्जता खादतमोदता एहीमादयो
न्यपदार्थे एहीडादय इति अस्मिन्नेककर्मणि वदेहीमं एहि प्रवं उद्धरकोष्ठात् उत्स्य ङदेहा विषयस्मा क्रियायां मातङ्गी स्य ङा उद
मविधमा असामान्यार्थमिह पाठ नङ्हिककर्मणा बङकलमासा कं कर्तरि वा लिट्धालि ङहायन कर्मणा बङकलसमस्यते
आती क्लेगम्य समासेन वेव कर्त्तालिखीयत इ वा घ ङद्धि ङोमः ङदिस्व वः नास्ति कृतोपि सम्बन्धस्य सो कृता नवः अ
न्यो राङा राङान्तरे विदेव विन्मात्रे इषदन्ता इषत्पिंगलः इषत्फुल्लवव नेनेति वा च इषदक्तं न च नक्षु पासमस्यते न
लोपो नञः नञो नस्य लोपः स्यादुत्तरपदे अ ब्राह्मणः वस्मान्नु कथि लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्
अनश्वः अर्थसिद्धव्यर्थी तावेन सह द्वंद्वं विकल्प्यते स्वादोप्यागम लघूमंद दाः पक्षो ङप्रभिति अनुतायाम संदिग्धमिति सि
ध्यवातिकप्रयोगा तेनानुपलब्धिर विवादः विध्नमित्यादि सिद्धं नञो न लोप स्तिङि क्षेपे अपचसि त्वं जाल्म नैक धेत्यादौ
तु नञा ह नसह सुप्सुपेति समासः नखाएन पान्न वेदा नासत्या न मुचि नकुल नख नपुंसक नक्षत्र नक नाकेषु प्रकृत्या पा
दितिज्ञाञ्जतः वेदाङ्गलसमुत्रैः न सत्या असत्या न असत्या नासत्या न मुंचती ति नमुचिः नकुलमस्य नख नमस्य नस्त्रीपुंमान् स्त्री ४२
पुंसयोर्यानपुंसक नक्षोविनिपात न क्षरतीति नक्षत्रं क्षीयते क्षरते वा क्षत्र मिति निपात्यते नकाम स्तीति नकाः कं सर्वं न
अकमस्मिन्निति नाकः नगो पाणिभ्य तस्यां नगइत्यपि न एकृत्याः नगाः अगाः पर्वताः अप्राणिषु किं अगो वृषलः
॥ अथ यदि वित क्रिया समीपवर्तित्व तेलनाकं नु × तना × नत्तसुक षावि कल्पत इ स्पर्धा तेन इ ङो दागमेसा दो अ संदेहा इति नञ तत्पुरुषः अर्थ नाया म संहित मित्यथयीतावः इति ङ्गावक
अनुपलब्धि अविवादो न नञ तत्पुरुषः आवि × तां × व्यामिस्यथयीता वोवि कल्पवृतः सिद्धः ॥ ६ ॥

धि॰

ज्ञीतेन नित्यं क्रीडाजीविकयोरित्यतो नित्यमनुवर्त्तमाने कुगतिप्रादयः एते समर्थेन नित्यं समस्यंते कुत्सितः पुरुषः कुपुरुषः ग
तिश्चेत्यनुवर्त्तमाने ऊर्यादिच्विडाचश्च एते क्रियायोगे गतिसंज्ञाः स्युः ऊरीकृत्य शुक्लीकृत्य पटपटाकृत्य कारिकाशब्दस्योप
संख्यानं कारिका क्रिया कारिकाकृत्य अनुकरणं चानितिपरं खाट्कृत्य अनितिपरं किं खाडिति कृत्वा निरष्ठीवत् आदरा
नादरयोः सदसती सत्कृत्य असत्कृत्य भूषणेलं अलंकृत्य भूषणे किं अलं कृत्वोदनं गतः पर्याप्तमित्यर्थः अनुकरणमि
त त्यादित्रिसूत्री स्वभावांकृत्विषया अंतरपरिग्रहे अंतर्हत्य मध्ये हत्वेत्यर्थः अपरिग्रहे किं अंतर्हत्वा गतः हतं परिगृह्य गत इत्यर्थः
कणेमनसी श्रद्धाप्रतीघाते कणेहत्य पयः पिबति मनोहत्य कणे शब्दः सप्तमीप्रतिरूपको निपातो ऽभिलाषातिशये वर्त्तते म
नः शब्दोप्यत्रैव पुरोव्ययं पुरस्कृत्य अस्तंच अस्तमिति मांतमव्ययं गतिसंज्ञं स्यात् अस्तंगत्य अच्छगत्यर्थवदेषु अव्ययमित्येव
अच्छगत्य अभिमुखं गत्वा उक्त्वेत्यर्थः अव्ययं किं जलमच्छं गच्छति अदोनुपदेशे अदः कृत्य अदः कृतं परंपक्षपदेशे तु प्रत्युदा
हरणं तिरोंतर्द्धौ तिरोभूय विभाषाकृञि तिरःकृत्य तिरस्कृत्य तिरः कृत्वा उपाजेन्वाजे एतौ कृञि वा गतिसंज्ञौ उपाजेकृत्य उ॰ पाजेकृत्वा॰
अन्वाजेकृत्य अन्वाजे कृत्वा दुर्बलस्य बलमाधायेत्यर्थः साक्षात्प्रभृतीनि च कृञि वा गतिसंज्ञानि स्युः च्व्यर्थ इति वक्तव्यं सा
क्षात्कृत्य साक्षात्कृत्वा लवणंकृत्य लवणं कृत्वा मांतत्वं निपातनात् अनत्याधान उरसिमनसी उरसिकृत्य उरसिकृत्वा अभ्यु
पगम्येत्यर्थः मनसिकृत्य मनसि कृत्वा निश्चित्येत्यर्थः अत्याधानमुपश्लेषणं तत्र न उरसि कृत्वा पाणिं शेते मध्येपदेनिवच
ने च एते कृञि गतिसंज्ञा वा स्युः अनत्याधाने मध्येकृत्य मध्ये कृत्वा निवचने कृत्य वाचं नियम्येत्यर्थः नित्यं हस्ते पाणावुपयम
ने कृञि उपयमनं विवाहः स्वीकारमात्रमित्यन्ये हस्तेकृत्य प्राध्वं बंधने प्राध्वमित्यव्ययं प्राध्वंकृत्य बंधनेनानुकूलं कृत्वेत्यर्थः
प्रार्थनादिना वा अनुकूल्य करणे प्राध्वं कृत्वा जीविकोपनिषदावौपम्ये जीविकामिव कृत्वा जीविकाकृत्य अपम्ये किं जीविकां

अत्राय मात्रायः यदा सुबुत्पत्तेः प्राक् समासवचनं तदा गौरी क्रियते तेन व्याघ्री अश्वक्रीती कच्छपी इति रूपं तस्मात् जातेरस्त्री विषयादयोपधात् इति अदंतत्वमनुवर्तते पूर्वं ङीषा ह्यत्र पश्चात् सुबुत्पत्तिः आकारांतत्वात् टाप् जातः पश्चाज्जा
तेरस्त्री [illegible] त्वे तन्ङीषः प्राप्तिरेव नास्ति अदंतत्वाभावात् तस्मात् सुबुत्पत्तेः प्राक् समासवचनं कर्तव्यमेतेन निर्वाहः ॥१८॥
*प्राचार्यः*

कुवाप्रादिग्रहणमगत्यर्थं सुपुरुषः अत्र वार्त्तिकानि प्रादयो गताद्यर्थे प्रथमया प्रगत आचार्यः प्राचार्यः अत्यादयः क्रांताद्यर्थे द्विती
यया अतिक्रांतो मालामतिमालः अवादयः क्रुष्टाद्यर्थे तृतीयया अवक्रुष्टः कोकिलया अवकोकिलः पर्यादयो ग्लानाद्य
र्थे चतुर्थ्या परिग्लानोऽध्ययनाय पर्यध्ययनः निरादयः क्रांताद्यर्थे पंचम्या निष्क्रांतः कौशांब्याः निष्कौशांबिः कर्मप्रवचनीया
नां प्रतिषेधः वृक्षं प्रति तत्रोपपदं सप्तमीस्थं सप्तम्यंते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदं उपपदसंज्ञं
स्यात् तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात् उपपदमतिङ् उपपदं सुबंतं समर्थेन नित्यं समस्यते अतिङ् तत्पुरुषः समासः कुंभं
करोतीति कुंभकारः इह कुंभ स्+कार इत्यलौकिकप्रक्रियावाक्यं अतिङ् किं मा सवान् तत्र माङि लुङिति सप्तमीनिर्देशात्
माङ् उपपदं अतिङ्ग्रहणं ज्ञापयति सुप्सुपेत्येतन्नेहानुवर्तते इति पूर्वस्मिन्नपि गतिग्रहणं छत्रकत्वात् तिङ्ग्रहणं तत्रापकृ
ष्यते सुपेति च निवर्त्तं तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धं व्याघ्री अश्वक्रीती कच्छपी अमैवा
व्ययेन अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते स्वादुंकारं नेह कालसमयवेलासु तुमुन् कालः समयो वेला
वा भोक्तुं अमैवेति किं अग्रे भोजं अग्रे भुक्त्वा विभाषाग्रे प्रथम पूर्वेष्विति क्त्वाणमुलौ अमा चान्येन तुल्यविधानमेतत् तृतीयाप्रभृ
तीन्यन्यतरस्यां उपदंशस्तृतीयायामित्यादीन्युपपदानि अमंतेनाव्ययेन सह वा समस्यंते मूलकेनोपदंशं भुंक्ते मूलकोप
दंशं भुंक्ते च तृतीयाप्रभृतीन्युपपदानि क्त्वांतेन सह वा समस्यंते उच्चैः कृत्य उच्चैःकृत्वा अव्ययेयथा[illegible] निर्देशत इति क्त्वा तृती
याप्रभृतीनीति किं अलं कृत्वा खलु कृत्वा तत्पुरुषस्यांगुलेः संख्याव्ययादेः संख्याव्ययादेरंगुल्यंतस्य तत्पुरुषस्य समासांतो [illegible] ४४
ऽच् स्यात् द्वे अंगुली प्रमाणमस्येति द्व्यंगुलं दारु निर्गतमंगुलिभ्यो निरंगुलं अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः एभ्यो रात्रेरच्
स्यात् चात् संख्याव्ययादेः अहर्ग्रहणं द्वंद्वार्थं अहश्च रात्रिश्च अहोरात्रः सर्वा रात्रिः सर्वरात्रः संख्यातरात्रः पुण्यरात्रः द्वयोरात्र्योः

ऋतिकर्मलोः काति
परतिवही॥

ःसमाहारो द्विरात्रं अतिक्रांतो रात्रिम् अतिरात्रः राजाहःसखिभ्यष्टच् एतदंतात्समासाट्टच् स्यात् परमराजः अतिराजो कृष्णसखः अन्हष्ट
खोरेव टिलोपः स्यान्नान्यत्र उत्तमाहः द्वे अहनी भृतो द्व्यहीनः तद्धितार्थे द्विगुः तमधीष्ट इत्यधिकारे द्विगोर्वेत्युत्पत्तौ रात्र्यहः सवत्सरा
त्रेति सखः लिंगविशिष्टपरिभाषया अतिराजी अति स्पष्टान्तेह महाराजी मद्रराज्ञी अक्रोडादिभ्यः सर्वादिभ्यः परस्मादन्हः इत्यस्य अन्हा
देशः स्यात् समासांते परे अकारांतात् अदंतपूर्वपदस्थाद्रेफात्परस्याह्नो नस्य णः स्यात् सर्वाह्णः संख्याताह्नः द्वयोरह्नोर्भवः का
लाट्ठञ् द्विगोर्लुगनपत्ये इति ठञो लुक् द्व्यह्नः स्त्रियामदंतत्वाट्टाप् द्व्यह्ना द्व्यह्नप्रियः त्र्यह्नः क्रुत्वादिभ्यः एभ्यो णत्वं न स्यात् दीर्घा
ह्नी प्रावृट् एवं चैतदर्थमह्न इत्यदंतानुकरणं केचिन्न कुर्वीत प्रातिपदिकांते णत्वं वा स्थित्वा क्रुत्वादि पाठस्यावश्यकत्वात् अ
दंतादिति तपरकरणान्नेह परागतमहः पराह्णः संख्यादेः समाहारे समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात् संख्यादेरिति
स्पष्टार्थं द्वयोरह्नोः समाहारः द्व्यहः त्र्यहः उत्तममेकाभ्यां च आभ्यामह्नादेशो न उत्तमग्राहो अर्थः पुण्यग्राह्यमाह पुण्यैकाभ्यामित्ये
व उक्तं सूत्रस्थितिं स्तुत्यादि एकाहः उत्तमपदं राज्ञोपांत्यस्यापि संग्रहार्थमित्येके संख्याताहः अध्यायन्याय्योद्गात्रः टच् स्यात् अ
ध्यायानामुरश्चाश्वोरसं अनुगवायामिति अध्यर्धः अनोश्मायस्सरसां जातिसंज्ञयोः टच् उपानसम् अमृताश्मः कालायसं मंडूकसरसमिति जा
तिः महानसं पिंडाश्मः लोहितायसं जलसरसमिति संज्ञा ग्रामकौटाभ्यां च तक्ष्णः ग्रामस्य तक्षा ग्रामतक्षः साधारण इत्यर्थः कौटं
तक्ष कौटः स्वतंत्रः अतिशयो रात्रौ स्थविरो नाज्ञया वृक्षकोऽस्तन्धः अतेः शुनः अतिश्वो वराहः अतिश्वी सेवा उपमानादप्राणिषु अप्राणिविषयकोप
मानवाचिनः श्वनष्टच् स्यात् आकर्षः श्वेवआकर्षश्वः अप्राणिषु किं वानरः श्वेव वानरश्वा उत्तरमृगपूर्वाच्च सक्थ्नः वाडुपमानाच्च
उत्तर सक्थं मृगसक्थं पूर्वसक्थं फलकमिव सक्थि फलकसक्थं नावो द्विगोः नौशब्दांताद् द्विगोष्टच् स्यात् न तु तद्धितलुकि द्वा
भ्यां नौभ्यामागता द्विनावरूप्यः द्विगोर्लुगनपत्ये इत्यत्र अचीत्यस्यापकर्षेणाहलादेर्नलुक् पंचनावप्रियः द्विनावं त्रिनावं अत
द्धितलुकीति किं पंचभिर्नौभिः क्रीतः पंचनौः अर्धाच्च अर्धान्नावष्टच् स्यात् नावोर्धमर्धनावं क्लीबत्वं लोकात् खार्याः [illegible] वा द्विगो

रथीद्वखार्या टज्वा स्यात् द्विखारं द्विखारि अर्द्धखारं अर्द्धखारि द्वित्रिभ्यामञ्जलेः ॥ टज्वा स्यात् द्विगौ द्व्यञ्जलं द्व्यञ्जलि अत[...]बहुव्रीहि
वद्धात्यामञ्जलिभ्यां अञ्जलिः ब्रह्मणो जानपदाख्यायां ब्रह्मान्तात्तत्पुरुषाट्टच् स्यात् समासेन जानपदत्वमाख्यायते चेत्
सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः कुमहद्भ्यामन्यतरस्यां आभ्यां ब्रह्मणो वा टच् स्यात् तत्पुरुषे कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा आन्महतः स-
मानाधिकरणजातीययोः महत आकारोऽन्तादेशः स्यात् समानाधिकरणे उत्तरपदे जातीये च परे महद्ब्रह्मः महाब्रह्मा महा-
देवः महाजातीयः समानाधिकरणे किं महतः सेवा महत्सेवा लाक्षणिकं विहायस्य ग्रहणमेतदिति समासोऽग्रहीबात् इति त्रिवत् महा-
बाहुर्नस्यात् तस्माद्बहुतरण प्रतिपदोक्तयोः प्रतिपदोक्तस्येति परिभाषानेह प्रवर्त्तते समानाधिकरणग्रहणसामर्थ्यात् आदि-
तियोगविभागादात्वं प्रागेकादशभ्यः इति निर्देशाद्वा एकादश महती रात्रिरूपस्येष्टिवत्कर्मधारयेति पुंवद्भावे कृते आत्वं महाजाती-
या महादात्वेघासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च असमानाधिकरणार्थमिदं महतो महत्या वा घासो महाघासः महा-
करः महाविशिष्टः अष्टनः कपाले हविषि अष्टाकपालं हविः गवि च युक्ते अष्टागवं शकटं अष्टन आत्वं वक्तव्यमित्यर्थः अ-
ष्टागवं शकटं अष्टप्रत्ययवचेत्युक्तं इति योगविभागाद्धुरा [...] अष्टानां गवां समाहारः अष्टागवं तद्युक्तत्वाच्छकटमष्टाग-
वं द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः आत्स्यात् द्वौ च दश च द्वादश द्व्यधिका दश द्वादश द्वाविंशतिः अष्टादश अष्टाविंशतिः
अबहुव्रीह्यशीत्योः किं द्वित्राः द्व्यशीतिः प्राक्शतादित्येव द्विशतं द्विसहस्रं त्रेस्त्रयः त्रिशब्दस्य त्रयस् स्यात् पूर्वविषये त्रयो-
विंशतिः बहुव्रीहौ तु त्रिदशाः त्रिर्दशाः सुजाद्यर्थे बहुव्रीहिः अशीतौ तु त्र्यशीतिः प्राक्शतादित्येव त्रिशतं त्रिसहस्रं विभाषा चत्वारिं-
शत्प्रभृतौ सर्वेषां द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्यात् चत्वारिंशदादौ परे द्विचत्वारिंशत् द्वाचत्वारिंशत् अष्टचत्वारिंशत् अष्टाचत्वारिं-
शत् त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् एवं पञ्चाशत्षष्ट्यादिष्वपि समत्रिनवतिषु एकादिर्नञ्प्रकृत्या स्यादेक-
स्यादुगागमश्च नञो विंशत्यादिसमासे एकान्नविंशतिः एकान्नत्रिंशत् योगविभागात् समासः अनुनासिकविकल्पः एकेनन वि-

[left margin] अंकत्वाद्यायामनेति नामः ५४ संख्या द्विगान्वे त्रिगतेत्वधि द्वित्रिवत्र्यर्थे इति सूत्र

[right margin] अनमहत्परमोत्कृष्ट इति सत्कालातायो मह द्रवेति समासः इत्वयङित्युक्ते इति पुंवद्भावे बाहुश्च महाबा हुरि प्रतिपदोक्तः सिव स्यात् महादेवो बाहुरित्य अत्रैव महा बाहुरितिन स्यात् बहुव्रीहौ तस्मा द्बहुत्वेन प्रतिपदोक्तो रिति परिभाषानेह वर्तत इति आदि तियोगविभा गो वाक्रियात्तत्र निबा दीवा महद्धृत्वाक समास कर्मसमानाधिक रण्येन तत्पुरुषम् महात:

४५

शतिः एकान्नविंशतिः एकाद्नविंशतिः एकोनविंशतिरित्यर्थः षष्ठत्वे दत्वे दशधासूत्तरपदे शुत्वं च धासु वेति वाच्यं षोडन् षोडश षोढा
षड्धा परवल्लिंगं द्वंद्वतत्पुरुषयोः एतयोः परपदस्येव लिंगं स्यात् कुक्कुटमयूर्यौ इमे मयूरीकुक्कुटाविमो अर्द्धपिप्पली द्विगुप्रा
प्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः पंचसु कपालेषु संस्कृतः पंचकपालः पुरोडाशः प्राप्तो जीविकां प्राप्तजीविकः आ
पन्नजीविकः अलंकुमार्यै अलंकुमारिः अतएव ज्ञापकात्समासः निष्कौशाम्बिः पूर्ववदश्ववडवौ द्विवचनमतंत्रं अश्ववडवौ
अश्ववडवान् अश्ववडवैः रात्राह्नाहाः पुंसि एतदंतौ द्वंद्वतत्पुरुषौ पुंस्येव अनंतरत्वात्परवल्लिंगतापवादोयं परत्वात्समाहा
रनपुंसकतां बाधते अहोरात्रः रात्रेः पूर्वभागः पूर्वरात्रः पूर्वाह्णः द्व्यहः संख्यापूर्वं रात्रं क्लीबं द्विरात्रं त्रिरात्रं गणरात्रं अपथं नपुंस
कं तत्पुरुषइत्येव अन्यत्र तु अपथो देशः कृतसमासांतनिर्देशान्नेह अपंथाः अर्द्धर्चाः पुंसि च अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्य
:अर्द्धर्चः अर्द्धर्चं ध्वजः ध्वजं एवं तीर्थशरीरमंडपयूषदेहअंकुशकलशइत्यादि जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां
एको व्रीहिर्वा बहुवचनं वा भवति ब्राह्मणाः पूज्याः ब्राह्मणः पूज्यः अस्मदो द्वयोश्च एकत्वे द्वित्वे च विवक्षिते अस्मदो बहुवचनं वा स्यात्
वयं ब्रूमः पक्षे अहं ब्रवीमि आवां ब्रूव इति वा सविशेषणस्य प्रतिषेधः पटुरहं ब्रवीमि फल्गुनीप्रोष्ठपदानां च नक्षत्रे द्वित्वे बहुव
चनं कार्यं वा स्यात् पूर्वे फाल्गुन्यौ पूर्वे प्रोष्ठपदे पूर्वाः फाल्गुन्यः पूर्वाः प्रोष्ठपदाः नक्षत्रे किं फाल्गुन्यौ माणविके तिष्यपुन
र्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य नित्यं द्विवचनं बहुत्वे बहुवचने तिष्यश्च पुनर्वसू [illegible] च तिष्यपुनर्वसू तिष्येति किं वि शाखा
षाढाः नक्षत्रेति किं तिष्यपुनर्वसवो माणवकाः सनपुंसकसमाहारे द्विगुर्द्वंद्वश्च नपुंसकं स्यात् परवल्लिंगापवादः पंच
गवं दंतोष्ठं अकारांतोत्तरपदो द्विगुः स्त्रियामिष्टः पंचमूली आबंतो वा पंचखट्वी पंचखट्वं अनो नलोपश्च वा द्विगुः स्त्रियां पंच
तक्षं पंचतक्षी पात्राद्यंतस्य न पंचपात्रं त्रिभुवनं चतुर्युगं पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा पुण्याहं सुदिनाहं पथः संख्याव्य

॥केनापिसूत्रेण प्रा
प्तद्विगुप्राप्तापन्नाल
निकै अलंपूर्वसमासनि
मासप्राप्तिकलंकुमारिरिति
समासः॥

यादेः संख्याव्ययरूपा[...]देः परः कृत समासांतः पथन्राष्टः क्लीबमित्यर्थः त्रयाणां पंथाः त्रिपथं विरूपः पंथाः विपथं कृतसम
*त* मासंग्रहणान्नेह सुपंथाः सामान्येनपुंसकं म्टङपचलितिप्रातः कमनीयं तत्पुरुषो नत्कर्मधारयः अधिकारोयं संज्ञायां कं
थोत्रीनरेषु कंथांतस्तत्पुरुषः क्लीबंस्यात् सावेडुत्रीनरदेशोत्पन्नायाः कंथायाः संज्ञा सुश्रमस्यापत्यानि सौश्रमयः तेषांकं
थासौश्रमिकंथं संज्ञायां किं वीरणकंथा उत्रीनरेषु किं दाक्षिकंथा उपज्ञोपक्रमं तदाद्याचिख्यासायां उपज्ञांतउपक्रांत
स्तत्पुरुषो नपुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्यमानयोरादिः प्राथम्यं वेदाख्यातुमिष्यते पाणिनेरुपज्ञा पाणिनिउ
पज्ञंग्रंथः नंदोपक्रमं द्रोणः छायाबाहुल्ये बाधा तत्पुरुषो नपुंसकं स्यात् तद्वंपदार्थबाहुल्ये इक्षूणांछाया इक्षुछायं वि
लायासेनेति विकल्पस्यापवादः इक्षुछाया निषादिन्य इतिउसमंता न्निषादिन्यइत्यादु प्रथमे बोधः सत्ता राजामनुष्यपू
र्वी एकापर्यायसर्वेश्चमनुष्यपूर्वश्चसंतास्तत्पुरुषोनपुंसकंस्यात् इनसभं ईश्वरसभं पर्यायस्यैवेष्यते नेह राजसभा
चंद्रगुप्तसभा अमनुष्यन्राष्टोरूद्यारक्षः पिशाचादीनाहरक्षः सभं पिशाचसभं अन्नालाच संघातार्थायासभा तदंतस्त
त्पुरुषः क्लीबंस्यात् स्त्रीसभं स्त्रीसंघात इत्यर्थः अन्नालाकिं धर्मसभा धर्मशालेत्यर्थः विसाधासेनासुराछायाशालानिशानां
एतदंतस्तत्पुरुषः क्लीबंवास्यात् ब्राह्मणसेनं ब्राह्मणसेना यवसुरं यवसुरा कुड्यछायं कुड्यछाया गोशालं गोशाला श्व
निशं श्वनिशा तत्पुरुषो नत्कर्मधारयइत्यनुवृत्तेर्नेह दृढसेनोराजा असेना परमसेना इति तत्पुरुषः अथ बहुव्रीहिः
अधिकारोयं द्वितीयाश्रितेत्यादिनांयस्यंत्रिकस्यंविशिष्यसमासोनोक्तः सशेषः प्रथमांतमित्यर्थः अनेकमन्यपदार्थे अनेकं
प्रथमांतं अन्यपदार्थेवर्तमानंवासमस्यते सबहुव्रीहिः अप्रथमाविभक्त्यर्थेबहुव्रीहिरितिसमानाधिकरणानामितिफलि
तं प्राप्तमुदकंयंग्रामं प्राप्तोदकोग्रामः ऊढरथोनड्वान् उपहृतपशूरुद्रः उद्धृतोदनास्थाली पीतांबरवीरपुरुषकोग्रामः प्रथ

४६

"प्रथमाविततिक्तिसं कस्वनद्विस्वन वेनमिति"

मार्धेवृत्तेन दृष्टे देवे गतः व्यधिकरणो नाम पि न पंचमीति स्त्रीं किं समस्य प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः प्रपतितः पर्णः प्रपर्णः न
ञोस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः अविद्यमानः पुत्रः अपुत्रः अस्तीति विभक्तिप्रतिरूपकमव्ययं अस्तिक्षीरा गौः स्त्रियाः पुंवद्भा
षितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणी प्रियादिषु भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिः निपातनात्पंच
म्या अलुक् षष्ठ्याश्च लुक् तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य शब्दस्य पुंवाचकस्ये तं*
व रूपं स्यात् समानाधिकरणे स्त्रीलिंगे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः गोस्त्रियोरिति ह्रस्वः चित्रा गावो यस्येति लौकिक
विग्रहे चित्रा अस् गो अस् इत्यलौकिकविग्रहे चित्रगुः रूपवद्भार्यः चित्रा जरती गौर्यस्येति विग्रहे अनेकोक्तेर्बहूनां बहुव्री
हिः अत्र केचित् चित्राजरतीगुः जरती चित्रागुर्वा एवं दीर्घातन्वीजंघः तन्वीदीर्घजंघः त्रिपदे बहुव्रीहौ प्रथमं न पुंवत् उत्तर
पदस्य मध्यमेन व्यवधानात् द्वितीयमपि न पुंवत् पूर्वपदत्वाभावात् उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः पूर्वपदशब्दश्च
प्रथमावयवे इति वदन्ति तन्न नेह पूर्वपदमाक्षिप्यते आनङ् ऋतो द्वन्द्वे इत्यत्र यथा तेनोपान्त्यस्य पुंवदेव चित्राजरद्गुरित्यादि ढ्रेतूपोन्हडिद्वितज कोरइतिबततवांस्यय याज्ञावृङ्॥
अत एव चित्रा जरत्यो गावो यस्येति द्वंद्वगर्भेऽपि चित्राजरद्गुरिति तात्पर्ये कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत् जरच्चित्रगुः कर्म
धारयोत्तरपदे तु चित्रजरद्गवीकः स्त्रियाः किं ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिः भाषितपुंस्कात् किं गंगाभार्यः अनूङ् किं
वामोरूभार्यः समानाधिकरणे किं कल्याण्या माता कल्याणीमाता स्त्रियां किं कल्याणी प्रधानं यस्य स कल्याणीप्रधानः पूरण्यां तु अपूरणी प्रिमा
ण्योः पूरणार्थप्रत्ययांतं यत् स्त्रीलिंगं तदंतात् समासेऽयं बहुव्रीहेः स्यात् कल्याणी पंचमी यासां रात्रीणां ताः कल्याणीपंच
मा रात्रयः स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः पुंवद्भावनिषेधोऽप्रधानपूरण्यामेव रात्रिः पूरणीवाच्या वेक्रोदाहरणेषु
स्याः अन्यत्र तु नद्युतश्च नद्यन्तरपदात् ऋदन्तोत्तरपदाच्च बहुव्रीहेः कप् स्यात् केऽणः केप्रत्यये अणो ह्रस्व स्यादिति प्राप्ते न कपि

कपिपरेकस्त्वेन स्यात् कल्याणपंचमीकः पक्षः अत्र तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थतया रात्रिप्रधानं बहुकर्तृकिः
अप्रियादिषु किं कल्याणीप्रियः प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता
वामा अबला तनया सामान्येन नपुंसकं दृढं भक्तिर्यस्य स दृढभक्तिः स्त्रीत्वविवक्षायां तु दृढाभक्तिः तसिलादिष्वाकृत्वसुचः त
सिलादिषु आकृत्वसुजंतेषु परेषु स्त्रियाः पुंवत्स्यात् परिगणनं कर्तव्यं अव्याप्त्यतिव्याप्तिपरिहाराय त्रतसौ तरप्तमपौ चरट्
जातीयरौ कल्पदेशीयरौ रूपप्पाशपौ थाल्तिलौ था तोथ बह्वीषु बहुत्र बहुतः दर्शनीयतरा दर्शनीयतमा घरूपे
ति वक्ष्यमाणेन ह्रस्वः पुंवद्भावं बाधते पट्वीतरा पट्वितमा पटुचरी पटुजातीया दर्शनीयकल्पा दर्शनीयदेशीया दर्शनी
यरूपा दर्शनीयपाशा बह्वीषु बहुशस्त्वा इकीट कृत्वसुचः अभ्यावृत्तिः बहुकल्पार्थस्य पुंवद्भावो वक्तव्यः बह्वीभ्यो देहि बहुशः
वृत्तिलोर्गुणवचनस्य भुक्ताः ताः भुक्तवत्यः कृता गुणवचनं किं कर्त्र्यस्ताः कर्त्रीत्व आरदः कृत्यादित्यादौ तु सामान्येन नपुंसकं स्य+
भस्याढे तद्धिते हस्तिनीनां समूहो हास्तिकं अढे किं रौहिणेयः स्त्रीभ्यो ढगिति ढोत्र इष्यते अग्ने ढगिति ढकि तु पुंवदेव आ
ग्नायी देवता अस्य स्थालीपाकस्य आग्नेयः सपत्नीशब्दः त्रिधा शत्रुपर्यायस्य पत्नीशब्दः द्वितीयः वादिवादित्वान्नोकः समानः पतिर्य
स्याः इति विग्रहे विवाहनिबंधनपत्नीशब्दमाश्रित्य नित्यस्त्रीलिंगो द्वितीयः स्वामीपर्यायपतिशब्देन तद्धितपुंस्कस्तृतीयः
आद्ययोः शिवाद्यणि सपत्न्या अपत्यं सापत्नः तृतीयात्तु लिंगविशिष्टपरिभाषया पक्षत्रयपदलक्षणेण्यपत्यवत्वण् शिवा
दीनां ढयोरेवारण्यात् सापत्यः तकद्भमोश्च नववत्याश्चात्रात्तावका नवदीयाः एतद्वार्तिकमेकतद्धितेचेति स्त्रेवनकर्त
व्यं सर्वनाम्नो वृत्तिमात्रे इति साध्यकारे ग्रागताद्वित्त सर्वमयः सर्वकाम्यति सर्विकाः सार्यास्यस्य सर्वकिस्तात्रसर्वप्रियः
इत्यादि सर्वस्यै देवं तस्त्रैघाढ्वितिलिंगात् तेना कथिएकत्रोषढत्रोवनसर्विकाः सर्वाः कृकर्त्यामेकादिषु कृकर्त्या अमं कृकं ४१
[illegible]

दोग्ध्री मृग्याः पदं मृगपदं मृगक्षीरं काकशावः क्यङ्मानिनोश्च एतयोः परतः पुंवत् एनीवाचरतीति एतायते श्येनीवाचर
तीति श्येतायते स्वभिन्नां कांचिद्दर्शनीयां मन्यते दर्शनीयमानिनी दर्शनीयां स्वां मन्यते दर्शनीयमानी चैत्रः न कोप
धायाः कोपधायाः स्त्रियाः न पुंवत् पाचिकाभार्यः रसिकाभार्यः मद्रिकाभार्यः मद्रिकायते कोपधप्रतिषेधे तद्धितवुग्रह
णं नेह पाकभार्यायस्य स पाकभार्यः संज्ञापूरण्योश्च अनयोर्न पुंवत् दत्ताभार्यः दत्तामानिनी दानक्रियानिमित्तः स्त्रियाः पुंसि
वसंज्ञास्ततोयमिति लाक्षणिकपुंस्कमस्ति पंचमीभार्या वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे वृद्धिशब्देन विहिता या वृद्धिस्तद्धे
तुर्यस्तद्धितो रक्तविकारार्थस्तदंतास्त्री न पुंवत् स्रौघ्नीभार्यः माथुरीयते माथुरीमानिनी वृद्धिनिमित्तस्य किं मध्यमभार्यः तद्धित
स्य किं काण्डलावभार्यः वृद्धिशब्देन किं तावद्भार्यः रक्ते तु काषायी कंथा यस्य स काषायकंथः विकारे तु हैमी मुद्रिका यस्य
हैममुद्रिकः वृद्धिशब्देन वृद्धिं प्रतिफलोपधानात्तावदिह पुंवत् वैयाकरणभार्यः सौवश्वभार्यः स्वांगाच्चेतः स्वांगाद्य ईकारस्त
दंतास्त्री न पुंवत् सुकेशीभार्यः स्वांगात्किं पटुभार्यः इतः किं सुकेशाभार्यः अमानिनीति वक्तव्यं सुकेशमानिनी सुकेश
मानिनी जातेश्च जातेः परो यः प्रत्ययस्तदंतं न पुंवत् शूद्राभार्यः ब्राह्मणीभार्यः सौत्रस्यैवायं निषेधः तेन हस्तिनीनां समू
+इति हो हास्तिकमित्यत्र तस्याद्वैं न वत्येव संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये संख्येयार्थया संख्यया अव्ययादयः समस्यं
ते स बहुव्रीहिः दशानां समीपे ये संति ते उपदशाः नव एकादश वेत्यर्थः बहुव्रीहौ संख्येये इति वक्ष्यमाणो डच् विंशति
तिविंशतेर्डिति विंशतेर्भस्य तिशब्दस्य लोपः स्यात् डिति आसन्नविंशाः विंशतेरासन्ना इत्यर्थः अदूरत्रिंशाः अधिक
चत्वारिंशाः द्वौ वा त्रयो वा द्वित्राः द्विरावृत्ता दश द्विदशाः विंशतिरित्यर्थः दिङ्नामान्यंतराले दिशो नामान्यंतराले वाच्ये
प्राग्वत् दक्षिणस्याः पूर्वस्याश्च दिशोरंतरालं दक्षिणपूर्वा नामग्रहणाद्यौगिकानां न ऐंद्र्याश्च कौबेर्याश्चांतरालं तत्रतेने

दमितिस्वरूपे सप्तम्यंते यदस्य विषये स्वरूपे पदे वृत्तौ यांतेव प्रहरणविषये इदं युद्धमित्यर्थे सप्तम्यंते कर्मव्यतिहारे सब
हुव्रीहिः इतिज्ञाप्यादस्य विषयविशेषो लभ्यते अन्येषामपि दृश्यते इति दीर्घः इत्यनुवर्त्तमाने इति कर्मव्यतिहारे बहुव्रीहौ पूर्व
पदस्य दीर्घः इच् समासांतो वक्ष्यते तिष्ठद्गुप्रभृतिष्विच् प्रत्ययस्य पाठादव्ययीभाव एवमव्ययत्वं च केशाकेशि केशेषु केशेषु गृहीत्वा युद्धं प्रवृ
त्तं केशाकेशि दंडादंडि दंडैश्च दंडैश्च प्रहृत्येदं युद्धं प्रवृत्तं दंडादंडि मुष्टीमुष्टि अरुणः उवर्णांतस्यान्त्यस्य गुणः स्यात् तद्धिते परे अवादेशः
बाहूबाहवि उरोदिति विकल्पं बाधगुणो किं: संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं तेन स्वायंभुवमित्यादि सिद्धं सरूपे ति
किं दंडेन मुसलेन तेन सहेति तुल्ययोगे तुल्ययोगे वर्त्तमानं सहेत्येतत् तृतीयांतेन प्राक्तत्वोपसर्जनस्य बहुव्रीहेरवय
* मः वस्य सहस्य सः स्यात् पुत्रेण सह सपुत्रः सह पुत्रो वागतः तुल्ययोगवचनं प्रायिकं सकर्मकः सलोमकः प्रकृत्याशिषि सहस्य शिषः
प्रकृत्या स्यात् आशिषि स्वस्ति राज्ञे सह पुत्राय सहामात्याय अगोवत्सहलेष्विति वाच्यं सगवे सवत्साय सहलाय बहुव्रीहौ संख्ये
ये डज् बहुगणात् संख्येये यो बहुव्रीहिस्तस्मात् डच् स्यात् उपदशाः अबहुगणात् किं उपबहवः उपगणाः अत्र स्वरे विशेषः सं
ख्यायास्तत्पुरुषस्य वाच्यः निर्गतानि त्रिंशतो निस्त्रिंशाः निर्वर्षाणि चैत्रस्य निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः बहुव्रीहौ स
क्थ्यक्ष्णोः स्वांगात् षच् व्यत्ययेन षष्ठी स्वांगवाचिसक्थ्यक्ष्यंताद्बहुव्रीहेः षच् स्यात् दीर्घसक्थः जलजाक्षी स्वा
गात् किं दीर्घसक्थि शकटं स्थूलाक्षा वेणुयष्टिः अक्ष्णोऽदर्शनादित्यच् अंगुलेर्दारुणि अंगुल्यंताद्बहुव्रीहेः षच् स्यात् दारुण्य ४८
र्थे पंचांगुलयो यस्य तत् पंचांगुलं दारु अंगुलीसदृशावयवं धान्यादिविक्षेपकाष्ठमुच्यते बहुव्रीहेः किं द्वे अंगुली प्रमाणम
स्या द्व्यंगुला यष्टिः तद्धितार्थेति तत्पुरुषे तत्पुरुषस्यांगुलेरित्यच् दारुणि किं पंचांगुलिर्हस्तः द्वित्रिभ्यां ष मूर्द्ध्नः आभ्यां मूर्द्ध्नः षः
स्यात् बहुव्रीहौ द्विमूर्द्धः त्रिमूर्द्धः नेतुर्नक्षत्रे अब्वक्तव्यः मृगो नेता यासां तां मृगनेत्रा रात्रयः पुष्यनेत्राः अंतर्बहिर्भ्यां च लो

उपसर्गादनोत्परइत्यस्यायम
र्थः उपसर्गात्परस्य नस्य णः
स्यात् स नकारो यदि उकार
परो न चेत् इति प्रणौ(त)द्
ओकारस्तु तो इत्यत्र णत्वं प्राप्नोति
इति तद्वारणाय षकारेणोक्तं
उपसर्गाद्बहुलमिति ॥६॥
क्षीसो

मः अञ्चालोम्नो ऽस्मात्त् बहुव्रीहेः अवलोमिः बहिर्लोमिः अग्रनासिकादयः संज्ञायां नसं वाऽस्थूलात्त् नासिकान्ताद्बहुव्रीहेरच्
स्यात् नासिकाशब्दस्य नसं प्राप्नोति नतु स्थूलपूर्वात् पूर्वपदात्संज्ञायामगः पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात् संज्ञायां
नतु गकारव्यवधाने द्रुरिव नासिका अस्य द्रुणसः खरणसः अगः किं ऋचामयनम् ऋगयनं आर्गयन इत्यादि निपातना
णत्वाभावमाश्रित्य अगदृति प्रत्याख्यानं भाष्ये अस्थूलात्किं स्थूलनासिकः खुरखराभ्यां वा नस् खुरणाः खरणाः पक्षे ऽज
पीष्यते खुरणसः खरणसः उपसर्गाच्च प्रादेर्यो नासिकायाः नसादेशः स्यात् असंज्ञार्थं वचनं उन्नता नासिका यस्य उन्नसः उपस
र्गादनोत्परः इति सूत्रं नरु षकारः स्थाने उपसर्गाद्बहुलं उपसर्गस्थान्निमित्तात्परस्य नस्य णः स्याद्बहुलं प्रणसः वेर्ग्रो वक्तव्यः
विगता नासिका अस्य विग्रः ख्यश्च विख्यः कथं तर्हि विनसः इत्यबाधवेत्ति वृत्तिः विगतया नासिकया उपलक्षितः इति व्याख्येयं
सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रेणीपदाजपदप्रोष्ठपदाः एते बहुव्रीहौ अच्प्रत्ययान्ता निपात्यन्ते शोभनं प्रातरस्य
सुप्रातः शोभनं श्वोऽस्य सुश्वः शोभनं दिवाऽस्य सुदिवः शारेरिव कुक्षिरस्य शारिकुक्षिः चतस्रोऽश्रयोऽस्य चतुरश्रः एण्या इव
पादावस्य एणीपादः अजपदः प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां अहलः
अहलिः असक्थः असक्थिः एवं दुःसुभ्यां शक्यो विनिपातनात्तं अशक्तः अशक्तिः नित्यमसिच्प्रजामेधयोः नञ्दुःसुभ्य इत्ये
व अप्रजाः दुःप्रजाः सुप्रजाः अमेधाः दुर्मेधाः सुमेधाः धर्मादनिच्केवलात् केवलात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्री
हेरनिच्स्यात् कल्याणधर्मा केवलात्किं परमः स्वो धर्मो ऽस्येति त्रिपदबहुव्रीहौ मा भूत् अवयवात्प्रहिते न केवलात्पूर्वपदं किंतु मध्य
मबाद्दपदिकं संदिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः एवं तु परमस्वधर्मेत्यपि साध्वेव निरुक्तिधर्मात्प्रत्युद्धि
द्विधर्मेत्यादिवत् पूर्वपदं तु बहुव्रीहिणाक्षिप्यते जंभा सुहरिततृणसोमेभ्यः जंभेति कृतसमासान्तं निपात्यते जंभा शोभन

+श्री+

केदंतेव त्रीणतनो कंतोऽस्य सुकंता हरितकंता त्रेणन कुंऽस्य त्रेणमिव दंताः स्येति विताद्रणकंता एवं सोमकंता स्वादित्यः किं
पतितकंतः दक्षिणेर्मा लुब्धयोगे दक्षिणेर्मा ब्रणं यस्य दक्षिणेर्मा मृगः व्याधेन क्षतव्रण इत्यर्थः इच्कर्मव्यतिहारे कर्मव्य
तिहारे द्योबहुव्रीहि समासांतः स्यादित्समासांतः केशाकेशि मुसलामुसलि इदं स्यादित्यर्थ तादयोऽविलंबिता एवं सिद्धार्थमि
च्छस्य समासांतोऽदंतो यस्मिन्नुदरणे तदंडादंडि मुसलामुसलि उत्तानहस्ति उत्तानदस्ति प्रसं व्यांजानुनोर्ज्ञुः प्रसंभ्यां परयो
र्जानुनो ज्ञु इत्यादेशः स्यात् बहुव्रीहौ प्रगते जानुनी यस्य प्रज्ञुः संज्ञुः ऊर्ध्वाद्विभाषा ऊर्ध्वज्ञुः ऊर्ध्वजानुः धनुषश्च
धनुरंतस्य बहुव्रीहेरनङादेशः स्यात् शार्ङ्गधन्वा वा संज्ञायां शतधन्वा शतधनुः जायाया निङ् जायांतस्य बहुव्रीहे
र्निङादेशः स्यात् लोपो व्योर्वलि वकारयकारयोर्लोपः स्यात् वलि युवजानिः युवतिर्जाया यस्य युवजानिः गंधस्येदुत्पू
तिसुसुरभिभ्यः एभ्यो गंधस्य इकारांतादेशः स्यात् उद्गंधिः पूतिगंधिः सुरभिगंधिः गंधस्येत्वे तदेकांतग्रहणं एकांतग्र
क देशाइव अविभागेन लक्ष्यमाणः इत्यर्थः सुगंधि पुष्पं सलिलं च सुगंधिर्वायुः नेह शोभना गंधा द्रव्याण्यस्य सुगंध आ
पणिकः अल्पाख्यायां सूपस्य गंधो लेशो यस्मिन् तत्सूपगंधि भोजनं घृतगंधि गंधो गंधकः आमोदे लेशे संबंधे गर्वे योषि
ति विश्वः उपमानाच्च पद्मस्येव गंधोऽस्य पद्मगंधिः पादस्य लोपोऽहस्त्यादिभ्यः हस्त्यादिवर्जितादुपमानात्परस्य पादस्य
लोपः स्याद्बहुव्रीहौ स्वामिहारे णांतसमासांतः व्याघ्रस्येव पादावस्य व्याघ्रपात् अहस्त्यादिभ्यः किं हस्तिपादः कुसूलपा
दः कुंभपदीषु च कुंभपद्यादिषु पादस्य लोपो ङीष् निपात्यते स्त्रियां पादः यस्य कुंभपदी स्त्रियां किं कुंभपादः संख्या
सुपूर्वस्य पादस्य लोपः स्यात् समासांतो बहुव्रीहौ द्विपात् सुपात् वयसि दंतस्य दतृ संख्यासुपूर्वस्य दंतस्य दतृ इत्यादेशः
:स्यात् वयसि द्विदन् चतुर्दन् षड्दंता अस्य शिशोः सुदन् सुदती वयसि किं द्विदंतः करी सुदंतः स्त्रियां संज्ञायां दं ५८

॥अर्थवद्ग्रहणेनानर्थकस्याग्रहणमिति स्याद्वाद को ऽसंविधिः तेन दंष्ट्रा ... बहुवाग्मिका वाग्मिनीरितिग्मिनि प्रत्यये पि साक्षरेव अना...
नीतेः ८

वस्य दत्तस्मात् समासांतो बहुव्रीहौ अयोदती फालदती संज्ञायां किं समदंती विभाषा श्यावारोकाभ्यां दंतस्य दत्तृ बहुव्रीहौ
श्यावदंतः अरोकदन् अरोकदंतः अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च एभ्यो दंतस्य दत्त्वा कुड्मलाग्रदन् कुड्मलाग्रदंतः ककु
दस्यावस्थायां लोपः असंजातककुत् पूर्णककुत् त्रिककुत्पर्वते त्रीणि ककुदान्यस्य त्रिककुत् संज्ञैषा पर्वतविशेषस्य त्रिक ह्री+
कुदोन्यः उद्विभ्यां काकुदस्य लोपः उत्काकुत् विकाकुत् काकुदं तालु पूर्णाद्विभाषा पूर्णकाकुत् पूर्णकाकुदः सुहृद्दु
र्हृदौ मित्रामित्रयोः सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते सुहृन्मित्रं दुर्हृदमित्रः अन्यत्र सुहृदयः उरःप्रभृतिभ्यः कप् व्यूढो ८*
रस्कः प्रियसर्पिष्कः इह पुमान् अनड्वान् पयः नौः लक्ष्मीरिति एकवचनांता नियम्यंते द्विवचनबहुवचनांतेभ्यस्तु शेषाद्वि
भाषेति विकल्पेन कप् द्विपुमान् द्विपुंस्कः अर्थान्नञः अनर्थकं नञः किं अपार्थं अपार्थकं इनः स्त्रियां बहुदंडिका नगरी
अतिग्रहणमन्यत्र ग्रहणान्यर्थवतानर्थकेनापि तदंतविधिं प्रयोजयंतीति बहुवाग्मिका स्त्रियां किं बहुदंडी बहुदंडिको ग्रामः
शेषाद्विभाषा अनुक्तसमासांतात् शेषाधिकारस्य बहुव्रीहेः कप् वा स्यात् महायशस्कः महायशाः अनुक्तेत्यादि किं व्याघ्र
पात् सुगंधिः प्रियपथः शेषाधिकारस्य किं उपबहवः उच्चैर्मुखः सुपुत्रः संज्ञायां नित्यं ... आपोन्यतर
स्यां कपि ह्रस्वत्वं स्याद्वा बहुमालाकः बहुमालकः कपि वा वेत्यौ मालः न संज्ञायां शेषादिति प्राप्तः कप् न
स्यात् संज्ञायां विश्वदेवाऽस्य विश्वदेवः ईयसश्च ईयसंतोत्तरपदान्न कप् बहवः श्रेयांसोऽस्य बहुश्रेयान् गोस्त्रियोरिति
ह्रस्वे प्राप्ते ईयसो बहुव्रीहेर्नेति वाच्यं बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी बहुव्रीहेः किं अतिश्रेयसि वंदिते भ्रातुः पूजिते
र्थयो भ्रातुः ... स्वदंतान्न कप् प्रशस्तो भ्राता यस्य प्रशस्तभ्राता सुभ्राता नद्यृतश्चेति प्राप्तः कप् बहुव्रीहौ सक्थ्यक्ष्णोः ७
शिरस्तः प्राग्वेति वक्ष्यते वंदिते किं मूर्खभ्रातृकः नाडीतंत्र्योः स्वांगे स्वांगे यौ नाडीतंत्र्यौ तदंतात् कप् न स्यात् बहुनाडिः

॥संख्याव्ययेत्यादिसोबहु
व्रीहौ ... ततः ...
र्थः॥१०

॥अपाद्वे ... सर्वे॥

कायः बहुव्रीह्यर्थो वा तत्रार्धमनी ष्वीवत्ययो तत्रा तावाद्र स्योन स्योगे किं बहुनामीकं स्तेतः बहुतत्रीकावीणा निष्पवाणि
ष्व कवबनावोः त्रिनिपात्यते प्रहर्वाद वते निर्द्ध प्रवाणौ तंत्रवायवत्रालाका निर्गताप्रवाणी अस्य निष्प्रवाणिः पटः समासवान्
नवनस्यर्थः सप्तमी विशेषणे बहुव्रीहौ सप्तम्यंतं विशेषणं च बहुव्रीहौ पूर्वं प्र योऽयं कंठेकालः अतएव ज्ञापकात् व्यधि
करणपदो बहुव्रीहिः चित्रगुः सर्वनामसंख्ययोरुपसंख्यानं सर्वश्वेतः द्विशुक्लः मिथोनयोः समासे संख्या पूर्वं ज्ञा द्वपर
विप्रतिषेधात् अन्यः संख्याया अल्पीयस्याः द्वित्राः द्वंद्वेऽपि ह्यवस्राववाविप्रतस्य गुरुप्रियः प्रियगुरुः गड्वादेः परा सप्तमी ग
डुकंठः कचित्न वक्ते गडुः निशाति निष्टातं बहुव्रीहौ पूर्वं स्यात् इत्यक्त्यः जातिकालसुखादिभ्यः परा निष्टा वाच्या सारंगज
ग्धी मासजाता सुखजाता प्राप्तिकंठे वंदं नतरुवृटः पीतोदकः वाहिताग्न्यादिषु आहिताग्निः अग्न्याहितः आकृतिगणो
ऽयं प्रहरणार्थेभ्यः परे निष्टा सप्तम्यो अस्युद्यतः दंडपाणिः कचित्न विहितासिः इति बहुव्रीहिः चार्थे द्वंद्वः अनेकं सुबं
तं चार्थे वर्तमानं वा समस्यते स द्वंद्वः समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः परस्परनिरपेक्षस्यानेकस्यैकस्मि
न्नन्वयः समुच्चयः अन्यतरस्यानुषंगिकत्वेनान्वयः मिलितानामन्वय इतरेतरयोगः समूहः समाहारः तत्रेश्वरं गुरुं
च भजस्वेति समुच्चये निक्षामट गां चानयेत्यन्वाचये च न समासो ऽस्यामर्थ्यात् धवखदिरौ संज्ञापरिभाषं अनेकोक्तेः दे
वयोर्त्रोरनेकोक्तारः द्वयोर्द्वंद्वं इत्याचुर्न द्वंद्वस्तातापाता नेकोक्तारः राजदंतादिषु परं पूर्वं वा योगार्थं परं स्यात् ५०
दंतानां राजा राजदंतः धर्मादिष्वनियमः अर्थधर्मो धर्मार्थौ दंपती दंपती जायापती जायापत्योः ह्रस्वकं तावद्वाभिधास्यते वा०
आकृतिगणोऽयं द्वंद्वे घि द्वंद्वे घिसंज्ञं पूर्वं स्यात् हरिश्च हरश्च हरिहरौ अनेकप्राप्तावेकत्र नियमो ऽनियमः शेषे हरिगुरु
हराः हरिहरगुरवः अजाद्यदंतं द्वंद्वे पूर्वं स्यात् इंद्राग्नी बहुष्वनियमः अश्वरथेंद्राः इंद्राश्वरथाः घोषितादज्ञाद्यदं

त विप्रतिषेधेन द्वंद्वः अल्पाच्तरं शिवकेशवौ ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण हेमंतशिशिरवसंताः कृत्तिकारोहिण्यौ
समाक्षराणां किं ग्रीष्मवसंतौ लघ्वक्षरं पूर्वं कुशकाशं अभ्यर्हितं च तापसपर्वतौ वर्णानामानुपूर्व्येण ब्राह्मणक्षत्रियविट्
शूद्राः भ्रातुर्ज्यायसः युधिष्ठिरार्जुनौ द्वंद्वश्च प्राणितूर्यसेनांगानां यथा द्वंद्व एकवत्स्यात् पाणिपादं मार्दंगिकपाणविकं र
थिकाश्वारोहं समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणं प्राण्यंगादीनां समाहार एव यथा स्यात् अनुवादे चरणानां
चरणानां द्वंद्व एकवत्स्यात् सिद्धस्योपन्यासे स्थेणोर्लुङि इति वक्तव्यं उदगात्कठकालापं प्रत्यष्ठात्कठकौथुमं अध्वर्युक्रतुरनपुं
सकं यजुर्वेदविहितो यः क्रतुः तद्वाचिनामनपुंसकलिंगानां द्वंद्व एकवत्स्यात् अर्काश्वमेधं अध्वर्युः क्रतुः किं इषुवज्रौ सा
मवेदविहितौ अनपुंसकं किं राजसूयवाजपेये अर्धर्चादी अध्ययनतो विप्रकृष्टाख्यानां अध्ययनेन प्रत्यासन्ना आख्या
येषां तेषां द्वंद्व एकवत् पदककमकं जातिरप्राणिनां प्राणिवर्ज्जजातिवाचिनां द्वंद्व एकवत् धानाशष्कुलि प्राणिनां तु वि
ट्शूद्राः द्रव्यवाचिनामेव नेह रूपरसौ गमनाकुंचने ज्ञाति विशिष्टा न एवाश्वमेधकवत्त्वावः द्रव्य विशेष वचनवाचायां तु बदराम
लकानि विशिष्टलिंगो नदीदेशोऽग्रामाः ग्रामवर्ज्ज नदीदेशवाचिनां भिन्नलिंगानां समाहारे द्वंद्वः स्यात् एकवत्त उद्ध
श्च इरावती च उद्ध्येरावति गंगाशोणं गंगाशोणं कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं भिन्नलिंगानां किं गंगायमु
ने मद्रकेकयाः अग्रामाः किं जांबवं नगरं शालूकिनी ग्रामः जांबवशालूकिन्यौ क्षुद्रजंतवः एषां समाहारे द्वंद्वः स्यात्
यूकालिक्षं आनकुलात् क्षुद्रजंतवः येषां विरोधः शाश्वतिकः एषां प्राग्वत् अहिनकुलं गोव्याघ्रं काकोलूकमित्या
दौ परत्वाद्विभाषावृक्षमृगेति प्राप्तं चकारेणबाध्यते शूद्राणामनिरवसितानां अनिरवसितानां शूद्राणां प्राग्वत् तक्षाय
स्कारं पात्राद्बहिष्कृतानां तु चंडालमृतपाः गवाश्वप्रभृतीनि च यथोच्चारितानि साधूनि गवाश्वं दासीदासमित्या दि

सि॰त॰कौ॰

५१

विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां वृक्षादीनां सप्तानां द्वंद्वः अश्ववडवेत्यादि द्वंद्वत्रयं
प्राग्वत् वृक्षादौ विशेषाणामेव ग्रहणं प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः रुरुपृषतं रुरुपृषताः कुशकाशं कुशकाशाः व्रीहियवं व्रीहि
यवाः दधिघृतं दधिघृते गोमहिषं गोमहिषाः शुकबकं शुकबकाः अश्ववडवं अश्ववडवौ पूर्वापरं पूर्वापरे अधरोत्तरं अधरो
त्तरे फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां बहुप्रकृतिरेव द्वंद्व एकवदिति वाच्यं बदराणि चामलकानि च ब
दरामलकं जातिरप्राणिनामित्येकवद्भावः नेह बदरामलके रथिकाश्वारोहौ प्लक्षन्यग्रोधावित्यादि विभाषावृक्षेति सूत्रेपि
प्राणिनस्तद्बोधग्रहणे जातिरप्राणिनामिति नित्यप्राप्ते विकल्पार्थं पशुग्रहणं हस्त्यश्वादिषु सेनांगत्वान्नित्यप्राप्ते मृगाणां मृगै
रेव शकुनीनां तैरेव च यत्र द्वंद्वः अन्येस्तु सहेतरेतरयोग एवेति नियमार्थं मृगशकुनीग्रहणं एवं पूर्वापरमधरोत्तरमित्यपि
अश्ववडवयोर्ग्रहणं तु पक्षे नपुंसकत्वार्थं अन्यथा परवत्त्वात् पूर्ववदश्ववडवाविति स्यात् विप्रतिषिद्धं चानधिकरणवाचि विरुद्धा
र्थानामद्रव्यवाचिनां द्वंद्व एकवद्वा स्यात् वैकल्पिकः समाहारद्वंद्वस्यार्थ इति सूत्रेण प्राप्तः सविरुद्धार्थानां चेदिदं भवति तर्हि शी
ऽद्रव्यवाचिनामेवेति नियमार्थं तेन द्रव्यवाचिनामितरेतरयोग एव शीतोष्णे उदके स्तः विप्रतिषिद्धं किं नंदकपांचजन्यौ इत्यादि ×इपाद्विक×
समाहारे द्वंद्वे नवत्येव न दधिपयआदीनि एतानि नैकवत्स्युः दधिपयसी इध्माबर्हिषी निपातनाद्दीर्घः ऋक्सामे वाङ्मनसे अ
धिकरणैतावत्त्वे च द्रव्यसंख्यावगमे एकवद्वेति नियमो न स्यात् दशदंतोष्ठाः विभाषा समीपे अधिकरणैतावत्त्वस्य सामीप्ये
न प्रसिद्धे समाहार एवेत्येवंरूपे नियमो वा स्यात् उपदशं दंतोष्ठं उपदशाः दंतोष्ठाः आनङ् ऋतो द्वंद्वे विद्यायोनिसंबंधवाचिनामृ ५१
दंतानां द्वंद्वे आनङ् स्यात् उत्तरपदे होतापोतारौ होतृपोतृनेष्टोद्गातारः मातापितरौ पुत्रेन्यतरस्यामित्यतो मंडूकप्लुत्या पुत्रे इ
त्यनुवृत्तेः पितापुत्रौ देवताद्वंद्वे च इहोत्तरपदे परे आनङ् मित्रावरुणौ वायुशब्दप्रयोगे प्रतिषेधः अग्निवायू वाय्वग्नी उभद्वंद्व

ग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहार्थं तेन ब्रह्मप्रजापती इत्यादौ नानङ् एतद्धि नैकहविर्विनियोगत्वेन श्रुतं नापि लोके प्रसिद्धसाहचर्यं
ईदग्नेः सोमवरुणयोः देवताद्वंद्व इत्येव अग्नेः स्तुत्स्तोमसोमाः अग्नेः परस्यैषां सस्य षः स्यात् समासे अग्निष्टुत् अग्निष्टोमः अग्नीषो
मौ अग्नीवरुणौ इद्वृद्धौ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्यात् देवताद्वंद्वे अ ग्नामरुतौ देवता अस्य आग्निमारुतं कर्म अग्नीवरु
णौ देवता अस्य आग्निवारुणं देवताद्वंद्वे चेत्युत्तरपदवृद्धिः अलौकिके वाक्ये आनङ् मा विवबाधित्वा इः वृद्धौ किं आग्नेंद्रः नेंद्रस्य
परस्येत्युत्तरपदवृद्धिप्रतिषेधः विष्णोर्न आग्नावैष्णवं दिवो द्यावा देवताद्वंद्वे उत्तरपदे द्यावा स्यात् द्यावाभूमिः द्यावाक्षामा दिवसश्च पृ
थिव्यां ॰ व इत्येव चात् द्यावा आदेशः अकारोच्चारणं सकारस्य रुत्वं मा भूदिति तदर्थं द्यौश्च पृथिवी च दिवस्पृथिव्यौ छंदसिदं दृष्टानु
विधिः द्यावाक्षितस्येदं पृथिवी दिवस्पृथिव्योर इति रित्यत्र पदकारा विसर्गं पठंति उषासोषसः उषस उषासादेशो देवता
द्वंद्वे उषासासूर्यं मातरपितरावुदीचां उदीचां किं मातापितरौ द्वंद्वाच्चुदषहांतात् समाहारे चवर्गांताद्दषहांताच्च द्वंद्वाट्टच् स्या
त् समाहारे वाक्त्वचं त्वक्स्रजं शमीदृषदं वाक्त्विषं छत्रोपानहं समाहारे किं प्रावृट्शरदौ इति द्वंद्वः अथैकशेषः सरूपाणां रा
मौ रामाः विरूपाणामपि समानार्थानां वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ कुटिलदंडौ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः वृ
द्धो यूना सहोक्तौ गोत्रं शिष्यते युवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ वृद्धः किं गर्गगार्ग्यायणौ
यूना किं गर्गगार्ग्यौ तल्लक्षणः किं भागवित्तिभागवित्तिकौ कृत्स्नं किं गार्ग्यवात्स्यायनौ स्त्रीपुंवच्च यूना सहोक्तौ वृद्धा स्त्री शिष्यते
तदर्थश्च पुंवत् गार्गी च गार्ग्यायणश्च गर्गाः अस्त्रियामित्यनुवर्तमाने यञञोश्चेति लुक् दाक्षी च दाक्षायणश्च दाक्षी पुमान्
स्त्रिया स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् हंसी च हंसश्च हंसौ भ्रातृपुत्रौ स्वसृदुहितृभ्यां भ्राता च स्वसा च
भ्रातरौ पुत्रश्च दुहिता च पुत्रौ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवच्चा

*दि*

अलौकिके ति
नहि आग्निवारुण
वरुणमवनस्यात् इव
ः सोमवरुणयोरिति
ईत्वे दीर्घश्च वरुणस्य
निषेध एव स्या ८

द्यावापृथिव्यौ*

छं*

त् तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शुक्ला पटी शुक्लं वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि पिता मात्रा मात्रा सहोक्तौ पिता
सि॰कौ॰ वा शिष्यते माता च पिता च पितरौ मातापितरौ श्वशुरः श्वश्र्वा श्वश्र्वा सहोक्तौ श्वशुरो वा श्वश्रू श्वशुरौ श्वशुरौ त्यदादीनि सर्वैर्नित्यं सर्वैः सहो
क्तौ त्यदादीनि नित्यं शिष्यते स च देवदत्तश्च तौ त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते स च यश्च यौ पूर्वशेषोऽपि दृश्यत इति
५२ भाष्यं स च यश्च तौ त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि सा च देवदत्तश्च तौ तच्च देवदत्ताश्च तानि पुंनपुंसकयोरेकपर
वान्नपुंसकं शिष्यते तच्च देवदत्तश्च ते अद्वंद्वतत्पुरुषविशेषणानामिति वक्तव्यं कुर्क्कटमयूर्याविमे मयूरीकुर्क्कटाविमौ
तच्च सर्वत्राद्वंद्वेऽपि इष्यते ग्राम्यपशुसंघेष्वतरुणेषु स्त्री एषु सहविवक्षायां स्त्री शिष्यते पुमान् स्त्रियेत्यस्यापवादः गाव इमाः ग्राम्ये
ति किं रुरव इमे पशुषु किं ब्राह्मणाः संघेषु किं एतौ गावौ अतरुणेषु किं वत्सा इमे अनेकशफेष्विति वाच्यं अश्वा इमे इह स
र्वत्रैकशेषकृतेऽनेकत्वाद्वा द्वंद्वेन तेन शिरश्च शिरांसि इत्यादौ समासस्यांतोदात्तः प्राक् पंगवादेकवद्भावश्च न पंचा
नो पंचानः इत्यादौ समासांतो न इत्येकशेषः ॥ कृत्तद्धितसमासैकशेषसनाद्यंता धातुरूपाः पंच वृत्तयः परार्थाभिधानं वृत्ति
: इत्यर्थबोधकं वाक्यं विग्रहः स द्विधा लौकिकोऽलौकिकश्च परिनिष्ठितत्वात् साधुर्लौकिकः प्रयोगानर्हः साधुरलौकिकः य
था राज्ञः पुरुषः राजन् अस् पुरुष सु इति अविग्रहो नित्यसमासः अस्वपदविग्रहो वा समासश्चतुर्द्धेति प्रायोवादः अव्ययीभा
व तत्पुरुष बहुव्रीहि द्वंद्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात् पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधान ५२
स्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वंद्वः इत्यपि प्रायोवादः प्रायेणेति प्राज्ञः सूपप्रति उन्मत्तगंग
मित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे द्वित्रा इत्यादौ बहुव्रीहौ दंतोष्ठमित्यादौ चाभावात् तत्पुरुषविशेषः कर्मधारयः
तद्विशेषो द्विगुः अनेकपदद्वंद्वबहुव्रीह्योरेव तत्पुरुषस्य क्वचिदेवेत्येकं किंच सुपां सुपा तिङा नाम्ना धातुनाथ तिङां ति

ङा सुबंतेनेति विज्ञेयः समासः षड्विधो बुधैः सुपां राजपुरुषः तिङां पर्यभूषयत् नाम्नां कुंभकारः धातुना कटप्रूः अजस्रं तिङं
तिङा पचतखादता तिङां सुपा कृंतविचक्षणेति यस्यां क्रियायां सा कृंतविचक्षणा एहीडादयो न्यपदार्थे इति मयूरव्यंसका
दौ पाठात्समासः इति सर्वसमासविशेषः ऋक्पूरब्धूःपथामानक्षे अ अनक्षे इतिच्छेदः ऋगाद्यंतस्य समासस्य अप्रत्ययो
ताद्धयवः स्यात् अक्षे या धूस्तदंतस्य तु न अर्द्धर्चः अनृचबह्वृचावध्येतर्येवेति नेह अनृचकं साम बह्वृचकं सूक्तं विष्णोः पूः वि
ष्णुपुरं क्लीबत्वं लोकात् विमलापं सरः द्व्यंतरुपसर्गेभ्योऽप ईत् अप इति कृतसमासस्यानुकरणे षष्ठ्यर्थे प्रथमा एभ्योऽपस्य
ई स्यात् द्विर्गता आपो यस्मिन् तत् द्वीपं अंतरीपं प्रतीपं समापो देवयजनमिति तु समा आपो यस्मिन्निति विग्रहे कृतसमासोऽतग्रह
णान्नेह स्वप् स्वपी स्वपि अवर्णांताद्वा प्रेपं परेपं प्रापं परापं कद्रनोर्देशे अनोः परस्य अपस्य ऊ स्यात् देशे अनूपो देशः राजध
र अक्षे तु अक्षधूः दृढधूरक्षः सखिपथो रम्यपथो देशः अनुप्रत्यन्ववपूर्वात्सामलोम्नः एतत्पूर्वात्सामलोमांतात्समासातोऽ
स्यात् प्रतिसामं अनुसामं अवसामं प्रतिलोमं अनुलोमं अवलोमं कृष्णोदकपांडुसंख्यापूर्वाया भूमेरजिष्यते कृष्णभूमः
उदकभूमः पांडुभूमः द्विभूमः त्रिभूमः प्रासादः संख्यायानदीगोदावरीभ्यां पंचनदं सप्तगोदावरं अङितियोगविभागादन्यत्रा
पि पंचनावः अक्ष्णोऽदर्शनात् अचक्षुःपर्यायादक्ष्णोऽच् स्यात् समासांतः गवामक्षीव गवाक्षः अचतुर विचतुर सुचतुर
स्त्रीपुंसधेन्वनडुहऋक्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषा
युषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः एते पंचविंशतिरजंता निपात्यंते आद्यास्त्रयो बहु
व्रीहयः अविद्यमानानि चत्वारि यस्य अचतुरः विचतुरः सुचतुरः अपात्यां चतुरोऽजिष्यते त्रिचतुराः चतुर्णां समीपे उपच
तुराः तत्र एकादशाद्या द्वंद्वाः स्त्रीपुंसौ धेन्वनडुहौ ऋक्सामे वाङ्मनसे अक्षिणी च भ्रुवौ च अक्षिभ्रुवं दाराश्च गावश्च दारगवं क

रू च अष्ठीवंतौ च ऊर्वष्ठीवं निपातनाट्टेर्लोपः पदष्ठीवं निपातनात्पादशब्दस्य पद्भावः नक्तं च दिवा च नक्तंदिवं रात्रौ च दिवा च
रात्रिंदिवं रात्रेर्मांतत्वं निपात्यते अहनि च दिवा च अहर्दिवं वीप्सायां द्वंद्वो निपात्यते अहन्यहनीत्यर्थः सरजसमिति साकल्ये
ऽव्ययीभावः बहुव्रीहौ तु सरजः पंकजं निश्चितं श्रेयो निःश्रेयसं तत्पुरुष एव नेह निःश्रेयान् पुरुषः पुरुषस्यायुः पुरु
षायुषं ततो द्विगुः द्व्यायुषं त्र्यायुषं ऋग्यजुषं ततो द्वंद्वः कर्मधारयः जातोक्षः महोक्षः वृद्धोक्षः शुनः समीपं उपशुनं टि
लोपाभावः संप्रसारणं च निपात्यते गोष्ठश्वाः गोष्ठश्वः ब्रह्महस्तिभ्यां वर्चसः अच्स्यात् ब्रह्मवर्चसं हस्तिवर्चसं पल्यराजभ्यां चेति वक्त
व्यं पल्यवर्चसं राजवर्चसं अवसमंधेभ्यस्तमसः संतमसं अंधयतीति अंधं पचाद्यच् अंधं तमो अंधतमसं श्वसो वसीयःश्रेयसः वसु
शब्दः प्रशस्तवाची ततः ईयसुनि वसीयः श्वः शब्द उत्तरपदार्थस्य सामानाधिकरण्यमाह मयूरव्यंसकादित्वात्समासः श्वोव
सीयसं श्वःश्रेयसं तेन तुल्यार्थं अन्ववतप्ताद्रहसः अनुरहसं अवरहसं तप्तरहसं प्रतेरुरसः सप्तमीस्थात् उरसि प्रत्युरसं वि ×श्रुति×
भक्त्यर्थे अव्ययीभावः अनुगवमायामे एतन्निपात्यते दीर्घत्वे अनुगवं यानं यस्य चायाम इति समासः द्विस्तावा त्रिस्तावा वेदि
: ततो द्विगुणा त्रिगुणा वा अश्वमेधादौ तत्रेदं निपातनं वेदिरिति किं द्विस्तावती त्रिस्तावती रज्जुः उपसर्गादध्वनः प्रगतो ध्वानं प्राध्वो
रथः न पूजनात् पूजनार्थात्परेभ्यः समासांता न स्युः सुराजा अतिराजा स्वतिभ्यामेव नेह परमराजः इत्यनात्किं गामतिक्रांतो
ऽतिगवः बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच् इत्यत्र प्रागेवायं निषेधः नेह सुसक्थः स्वक्षः किमः क्षेपे क्षेपे यः किंशब्दस्ततः परं यत्तदंतान्न समा
सांता न स्युः कुत्सितो राजा किंराजा किंसखा किंगौः क्षेपे किं किंराजः किंसखः किंगवः नञस्तत्पुरुषात् समासांतो न अ
राजा असखा तत्पुरुषात्किं अधुरं शकटं पथो विभाषा नञ्पूर्वात्पथो वा समासांतः अपथं अपंथाः तत्पुरुषादित्येव अपथो दे
शः अपथं वर्त्मेति इति समासांताः अलुगुत्तरपदे अलुगधिकारः प्रागानङः उत्तरपदाधिकारस्त्वापादपरिसमाप्तेः पंचम्याः

स्तोकादिभ्यः एभ्यः पंचम्या अलुक्स्यात् उत्तरपदे स्तोकान्मुक्तः एवमंतिकार्थदूरार्थकृच्छ्रेभ्यः उत्तरपदे किं निष्क्रांतः स्तोकान्निःस्तोक
ः ब्राह्मणाच्छंसिन उपसंख्यानं ब्राह्मणानि हितानि शास्त्राण्युपचाराद् ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषः द्विती
यार्थे पंचम्युपसंख्यानं ओजः सहोंभस्तमसस्तृतीयायाः ओजसाकृतमित्यादि अंजसउपसंख्यानं अंजसाकृतं आर्जवेन कृतमि
त्यर्थः पुंसानुजो जनुषांध इति च पुंसानुजः पुमान् स पुंसानुजः जनुषांधो जात्यंधः मनसः संज्ञायां मनसागुप्ता आज्ञायिनि
च मनसइत्येव मनसा आज्ञातुं शीलमस्य मनसाज्ञायी आत्मनश्च आत्मनस्तृतीयाया अलुक्स्यात् पूरणइति वक्तव्यं पूरणप्र
त्ययांते उत्तरपदे इत्यर्थः आत्मनापंचमः जनार्दनस्त्वात्मचतुर्थ एव इति तु बहुव्रीहिर्बोध्यः पूरणे किं आत्मकृतं वैयाकरणाख्या
यां चतुर्थ्याः आत्मनइत्येव आत्मनेपदं आत्मनेभाषाः तादर्थ्ये चतुर्थी चतुर्थीति योगविभागात्समासः परस्य च परस्मैपदं पर
स्मैभाषाः हलदंतात्सप्तम्याः संज्ञायां हलंतादकारांताच्च सप्तम्या अलुक्स्यात्संज्ञायां त्वचिसारः गवियुधिभ्यां स्थिरः आभ्यां स्थिरस्य षः
स्यात् गविष्ठिरः अत्र गवीति वचनादेवालुक् युधिष्ठिरः अरण्येतिलकाः अत्र संज्ञायामिति सप्तमीसमासः हृद्द्युभ्यां च हृ
दिस्पृक् दिविस्पृक् कारनाम्नि च प्राचां हलादौ प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदंतात्सप्तम्या अलुक् मुकुटे
कार्षापणं हषदि माषकः पूर्वेण सिद्धे नियमार्थं कारनाम्न्येव प्राचामेव हलादावेवेति कारनाम्नि किं अभ्याहितपशुः कार
दन्यत्पेतद्देयस्य नाम प्राचां किं यूथपशुः हलादौ किं अविकटोरणः अदंतात्किं नद्यांदोहः नदीदोहः मध्याद्गुरौ मध्येगुरुः अं
ताच्च अंतेगुरुः अमूर्धमस्तकात्स्वांगादकामे कंठेकालः उरसिलोमा अमूर्धमस्तकात्किं मूर्द्धशिखः मस्तकशिखः अकामे
किं मुखेकामोऽस्य मुखकामः बंधे च विभाषा हलदंतात्सप्तम्या अलुक् हस्तेबंधः हस्तबंधः हलेतिकिं गुप्तिबंधः तत्पुरुषे
कृतिबहुलं स्तंबेरमः कर्णेजपः क्वचिन्न कुरुचरः प्रावृट्शरत्कालदिवां जे प्रावृषिजः शरदिजः कालेजः दिविजः पूर्व

स्याद्यध्ययेचः विभाषावर्षक्षरशरवरात् एभ्यः सप्तम्या अलुक् कडे वर्षेजः वर्षजः क्षरेजः क्षरजः शरेजः शरजः वरेजः वरजः घकालतनेषु
कालनाम्नः सप्तम्या विभाषा लुक् स्यात् घ पूर्वाह्णेतरे पूर्वाह्णतमे पूर्वाह्णेतरे काल: पूर्वाह्णेकाले पूर्वाह्णकाले तन पूर्वाह्णेत
ने पूर्वाह्णतने शयवासवासिष्वकालात् खेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी अपो योनियन्मतिषु
अप्सुयोनिरुत्पत्तिर्यस्य सोऽप्सुयोनिः अप्सु भवोऽप्सव्यः अप्सुमंतौ वाङ्मनसागौ नेन्सिद्धबध्नातिषु इन्नंतादिषु सप्तम्या अलुग्न
स्थंडिलशायी सांकाश्यसिद्धः चक्रबंधः षष्ठ्या आक्रोशे षष्ठ्या अलुक् समस्ते आक्रोशे किं क्रोशे स्यात्खरेहः षष्ठ्या आक्रोशे चौरस्यकु
लं आक्रोशे किं ब्राह्मणकुलं वाग्दिक्पश्यद्भ्यो युक्तिदंडहरेषु वाचोयुक्तिः दिशोदंडः पश्यतोहरः आमुष्यायणः आमुष्यपुत्रिका
आमुष्यकुलिकेति च अमुष्यापत्यं आमुष्यायणः नडादित्वात्फक् अमुष्यपुत्रस्य भाव आमुष्यपुत्रिका मनोज्ञादित्वाद्वुञ् एवं
आमुष्यकुलिका देवानांप्रिय इति च षष्ठ्या अलुक् अन्यत्र देवप्रियः शेपपुच्छलांगूलेषु शुनः शुनःशेपः शुनःपुच्छः शुनोलांगूलः दिवश्च दा
से दिवोदासः पुत्रेऽन्यतरस्यां षष्ठ्याः पुत्रे परे अलुग्वा निन्दायां दास्याःपुत्रः दासीपुत्रः निन्दायां ब्राह्मणीपुत्रः ऋतो विद्यायोनिसंबंधेभ्यः योनि
विद्यासंबंधयोनिसंबंधवाचिन ऋदंतात् षष्ठ्या अलुक् होतुरंतेवासी होतुःपुत्रः पितुरंतेवासी पितुःपुत्रः विद्यायोनिसंबंधेभ्यस्तत्पूर्वोत्त
रपदग्रहणं नेह होतृधनं पितृगृहं विभाषा स्वसृपत्योः ऋदंतात् षष्ठ्या अलुग्वा स्वसृपत्योः परयोः मातुःपितुर्भ्यामन्यतरस्यां आभ्यां स्व
सुःसस्य षो वा स्यात् समासे मातुःस्वसा मातुःष्वसा पितुःष्वसा पितुःस्वसा लुक्पक्षे तु मातृपितृभ्यां स्वसा आभ्यां परस्य स्वसुःसस्य
षः स्यात् समासे मातृष्वसा पितृष्वसा असमासे तु मातुःस्वसा पितुःस्वसा इत्यलुक्समासः घरूपकल्पचेलड्ब्रुवगोत्रमतहते
षु ङ्योऽनेकाचो ह्रस्वः भाषितपुंस्काद्योङी तदंतस्यानेकाचो ह्रस्वः स्यात् घरूपकल्पपत्ययेषु परेषु चेलडादिषु चोत्तरपदेषु ब्रा
ह्मणितमा ब्राह्मणिरूपा ब्राह्मणिकल्पा ब्राह्मणिचेली ब्राह्मणिब्रुवा ब्राह्मणिगोत्रेत्यादि ब्रु[illegible]तः पवादा स्विव प्यादेशा गुण

ण्योरन्नावोपि निपात्यते चेलादीनि इति विषये क्त्मनवावीनितैः क्त्मितानिक्कननैरिति समासः ङ्याः किं दत्तातरा गार्गितवं
स्का किं आमलकीतरा कुवलीतरा नद्याः शेषस्यान्यतरस्यां अङ्यन्तनद्याः ङ्यन्तेकाचश्च घादिषु ह्रस्वो वा स्यात् ब्रह्मबंधूतरा ब्र
ह्मबंधुतरा स्त्रीतरा स्त्रितरा कृन्नद्या न लक्ष्मीतरा उगितश्च उगितः परा नदी तदंतस्य घादिषु ह्रस्वो वा स्यात् विदुषितरा ह्र
स्वाभावपक्षे तसिलादिष्विति पुंवत् विद्वत्तरा ह्रस्वादिषु विदुषीतरेत्यप्युदाहृतं तन्निर्मूलं हृदयस्य हृल्लेखयदण्लासे
षु हृदयं लिखतीति हृल्लेखः हृदयस्य प्रियं हृद्यं हृदयस्येदं हार्दं हृल्लासः लेखेत्यणंतस्य ग्रहणं घञि तु हृदयलेखः लेख
ग्रहणमेव ज्ञापकं उत्तरपदाधिकारे तदंतविधिर्नास्तीति वा शोकष्यञ्रोगेषु हृच्छोकः हृदयशोकः सौहार्द्यं सौहृदय्यं हृ
द्रोगः हृदयरोगः हृदयशब्दपर्यायो हृच्छब्दोप्यस्ति तेन सिद्धे नियमार्थमिदं पादस्य पदाज्यातिगोपहतेषु एषूत्तरपदेषु पाद
स्य पद इत्यदंत आदेशः स्यात् पादाभ्यामजतीति पदाजिः पदातिः अज्यतिभ्यां पादे चेतीण् एतत्सूत्रः अजेर्वीभावो निपातना
त् पदगः पदोपहतः पद्यत्यतदर्थे पादस्य पत्स्यात् तदर्थे यति परे पादौ विध्यंतिपद्याः शर्कराः अतदर्थे किं पादार्थमुदकं पाद्यं
इके चरतावुपसंख्यानं पादाभ्यां चरति पदिकः पद्योर्हिमकाषिहतिषु च पद्धिमं पत्काषी पद्धतिः ऋचः शे ऋच
:पादस्य पच्छ्यात् शे परे गायत्री पच्छः शंसति पादंपादमित्यर्थः ऋचः किं पादशः कार्षापणं ददाति वा घोषमिश्रशब्देषु पादस्य
पत् पद्घोषः पादघोषः पन्मिश्रः पादमिश्रः पच्छब्दः पादशब्दः निष्के चेति वाच्यं पन्निष्कः पादनिष्कः उदकस्योदः संज्ञायां उ
दमेघः उत्तरपदस्य चेति वक्तव्यं क्षीरोदः पेषंवासवाहनधिषु च उदपेषं पिनष्टि उदवासः उदवाहनः उदधिर्घटः समु
द्रे तु पूर्वेण सिद्धं एकहलादौ पूरयितव्येन्यतरस्यां उदकुंभः उदककुंभः एके इति किं उदकस्थाली पूरयितव्ये किं उदकपर्व
तः मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च उदमंथः उदकमंथः उदौदनः उदकौदनः इको ह्रस्वोऽङ्यो गालवस्य इ

सि॰ कौ॰
५५

ंतस्याङ्गं तस्य ह्रस्वो वा स्यादुत्तरपदे ग्रामणिपुत्रः ग्रामणीपुत्रः इकः किं रमापतिः अङ्यः किं गौरीपतिः गालवग्रहणं पूजार्थं
अन्यतरस्यामित्यनुवृत्तेः इयङुवङ्भाविनामव्ययानां च नेति वाच्यं श्रीमदः भ्रूभंगः शुक्लीभावः अभ्रुकुंसादीनामिति वक्तव्यं
भ्रुकुंसः भ्रुकुटिः भ्रूकुंसः भ्रूकुटिः अकारोऽनेन विधीयते इति व्याख्यांतरं भ्रकुटिः भ्रुवा कुंसो भाषणं शोभा वा यस्य सः
स्त्रीवेषधारी नर्त्तकः भ्रुवः कुटिः कौटिल्यं एक तद्धिते च एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे च एकस्या आगतं एकरूप्यं ए
कक्षीरं ङ्यापोः संज्ञाछन्दसोर्बहुलं रेवतीपुत्रः अजाक्षीरं वेव वपत्यधे परिभाषापोवादिकस्य अजावेरोहिणीव ष्यङः संप्रसारणं
पुत्रपत्योस्तत्पुरुषे ष्यङंतस्य पूर्वपदस्य संप्रसारणं स्यात् पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे संप्रसारणस्य संप्रसारणस्य दी
र्घः स्यादुत्तरपदे कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः कौमुदगंधीपतिः व्यवस्थितविभाषया ह्रस्वो न स्त्रीप्रत्यये चानुप
सर्जने नेति तदादिनियमप्रतिषेधात् परमकारीषगंधीपुत्रः उपसर्जने तु तदादिनियमान्नेह अतिकारीषगंध्यापुत्रः बंधु
नि बहुव्रीहौ बंधुशब्दे उत्तरपदे ष्यङः संप्रसारणं स्यात् बहुव्रीहौ कारीषगंध्या बंधुरस्येति कारीषगंधीबंधुः बहुव्रीहौ
किं कारीषगंध्यायाः बंधुः कारीषगंध्याबंधुः क्लीवनिर्देशाच्छब्दस्वरूपपि कृत्या मातच्मातृकमातृषु वा कारीषगंधीमा
तः कारीषगंध्यामातः कारीषगंधीमातृकः कारीषगंध्यामातृकः कारीषगंधीमाता कारीषगंध्यामाता अस्मादेव निपातना
न्मातृशब्दस्य मातजादेशः कश्चित्कल्पयत्र बहुव्रीहावेवेदं नेह कारीषगंध्यामाता कारीषगंधीमाता चित्त्वसामर्थ्यात् चित्स्व ५५
रो बहुव्रीहिस्वरं बाधते इष्टकेषीकामालानां चिततूलभारिषु इष्टकादीनां तदंतानां पूर्वपदानां चितादिषु क्रमादुत्तर
पदेषु ह्रस्वः स्यात् इष्टकचितं पक्वेष्टकचितं इषीकतूलं मुंजेषीकतूलं मालभारी उत्पलमालभारी कारे सत्यागदस्य मु
म् स्यात् सत्यंकारः अगदंकारः अस्तोश्चेति वक्तव्यं अस्तुंकारः धेनोर्भव्यायां धेनुंभव्या लोकस्य पृणे लोकंपृणः इत्यविम्

जवितुजादिशाकः इत्येनव्यासस्य अन्तस्यामित्यः इरतः परिहर्तव्या धीः स्वाङ्गात्ये रिधे स्वाङ्गमिधः अग्निमिधः गिलेऽगिलस्य तिमि
गिलः अगिलस्य किं गिलगिलः गिलगिलेव तिमिंगिलगिलः उष्णभद्रयोः करणे उष्णंकरणं भद्रंकरणं रात्रेः कृति विभाषा रात्रि
चरः रात्रिंचरः रात्रिमटः रात्र्यटः अखिदर्थमिदं सूत्रं खिति तु अरुर्द्विषदिति नित्यं वक्ष्यते रात्रिंमन्यः सहस्य सः संज्ञायां उत्तरपदे
सपलाशं संज्ञायां किं सहयुध्वा ग्रंथांताधिके च अनयोरर्थयोः सहस्य सः स्यादुत्तरपदे सकलं ज्योतिषमधीते सद्रोणा खारी
द्वितीये चानुपाख्ये अनुमेये द्वितीये सहस्य सः स्यात् सराक्षसीका निशा राक्षसीसाक्षात् अनुपलभ्यमाना निशायामुमीयते
समानस्य छंदस्यमूर्धप्रभृत्युदर्केषु समानस्य सः स्यात् उत्तरपदे न तु मूर्धादिषु अनुजाता सगर्भ्यः अनुसख्या सयूथ्यः योनः
सनुत्यः तत्र भवः इत्यर्थे सगर्भसयूथसनुताद्यत् अमूर्धादिषु किं समानमूर्धा समानप्रभृतयः समानोदर्काः समानस्य तियो
गोविभज्यते तेन सपक्षः साधर्म्यं सजातीयः इत्यादि सिद्धमिति काशिका अथवा सह नाहः सहस्य वचनोऽस्ति सहस्रः सखा सम
ख्वीतिरोषा तेनायमस्वपदविग्रहो बहुव्रीहिः समानः पक्षोऽस्येत्यादि ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोव
चनबंधुषु एषु दशसूत्तरपदेषु समानस्य सः स्यात् सज्योतिः सजनपद इत्यादि चरणे ब्रह्मचारिणि ब्रह्मचारिण्युत्तरपदे
समानस्य सः स्यात् चरणे समाने विनगम्यमाने चरणः शाखा ब्रह्मवेदः तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति ब्रह्मचारी समा
नः सः सब्रह्मचारी तीर्थे ये तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात् सतीर्थ्यः एकगुरुकः समानतीर्थे वासीति
यत्प्रत्ययः विभाषोदरे यादौ प्रत्यये विवक्षित इत्येव सोदर्यः समानोदर्यः दृग्दृशवतुषु सदृक् सदृशः दृक्षे चेति वक्तव्य
सदृक्षः वतुरु तरार्थः इदंकिमोरीश्की दृग्दृशवतुषु इदमः ईश किमः कीस्यात् ईदृशः कीदृक् कीदृशः वतुवदादरेणैव
क्ष्यते दृक्षे च ईदृक्षः कीदृक्षः आसर्वनाम्नः सर्वनाम्न आकारः स्यात् दृग्दृशवतुषु दृक्षे च तादृक् तादृशः तावान् तादृक्षः

अंगुलिषंगः सीरोःस्था
ने×१

सि०ध्या०कौ०

५६

दीर्घमेवोवे अमूर्द्धन्नाः अमूर्द्धक अमूर्द्धकः समासेंगुलेः संगः अंगुलित्राद्यामंगस्यससमूर्द्धन्यः स्यात्समासे सीरुष्ठानं अस
मासेतु सीरोःस्थाने ङ्योतिराग्नुषः स्तोमः आज्यास्तोमस्य समस्यमूर्द्धन्यः समासे ङ्योतिष्टोमः आयुष्टोमः समासे किं ङ्योतिषः
स्तोमः सुषमादिषु च सस्यमूर्द्धन्यः ञोतनं सामसस्यसुषामा सुषधिः एतिसंज्ञायामगात् हरिषेण एतिकिं हरिसक्थः संज्ञा
यां किं षष्ठसेनः अगकारात्किं विश्वक्सेनः इएकोरित्येव सर्वसेनः नक्षत्राद्वा एतिसंज्ञायामगकारान्मूर्द्धन्यो वा रोहिणीषेणः
रोहिणीसेनः अगकारात्किं शतभिषक्सेनः आकृतिगणोऽयं अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुको
तिकारकरागछेषु अन्यत्राद्य दुगागमः स्यात् आशीरादिषुपरेषु अन्यदाशीः अन्यदाशा अन्यदास्था अन्यदास्थितः अन्य
दुत्सुकः अन्यदूतिः अन्यद्रागः अषष्ठीत्यादिकिं अन्यस्यान्येन वा आशीरन्याशीःकारके छेचनायं निषेधः अन्यस्यकारको
न्यकारकः अन्यस्यार्थमन्यदीयं गहादेराकृतिगणत्वात् अर्थे विभाषा अन्यदर्थः अन्यार्थः कोःकत्तत्पुरुषेऽचि अजादावु
त्तरपदे कुशिक्दोः स्थाने कदस्यात् कदन्नं तत्पुरुषे किं कूष्ट्रो राजा कोष्ठ कश्चिता स्वत्प्रः कत्रयः रथवदयोश्च कद्रथः कद्वदः तृणे
च जातौ कत्तृणं कापथ्यक्षयोः कापथं काक्षः अकत्राद्येन तत्पुरुषः अकिंशब्देन बहुव्रीहिर्वा ईषदर्थे ईषदकालं अजादा
वपि परत्वात्कादेशः काम्लः विभाषापुरुषे कावत्पुरुषः कुपुरुषः आषात्विभाषेयं ईषदर्थे हि दूर्वविधि निषेधात् नित्यमेव क
वं कोष्णं तस्मादुत्तरपदे कवं कावश्च वा स्यात् कोष्णं कवोष्णं कदुष्णं पृषोदरादीनि यथोपदिष्टं पृषोदरप्रकारादीनि शि ५६
ष्टैर्यथोच्चारितानि तथैव साधूनि पृषतःउदरं पृषोदरं तलोपः वारिवाहकोबलाहकः दूर्वपदस्य वः उत्तरपदादेश्च लत्वं सवे
र्णागमः हंसः सिंहो वर्णविपर्यायात् गूढोत्मा वर्णविकृते वर्णनाशात् पृषोदरं दिक्शब्देभ्यस्तीरस्य तारभावो वा दक्षि
णतारं दक्षिणतीरं उत्तरतारं उत्तरतीरं दुर्गादानां तावंदस्योत्तरे उत्तरपदादेष्टुत्वं च उःखेन दास्य तिदूडाशः उःखेन न

श्यते दूणाशः दुःखेन दभ्यते दूढभः खल्त्रिभ्यः दसे नलोपो निपात्यते दुःखेन ध्यायति दूढ्यः आतश्चेति कः ऊत्वं तोऽस्यासादिति ष
सी ऊत्वं शाष्टस्य ष्टु आदेशाः सदेरधिकरणे ष्ट्रू आकृतिगणोऽयं संहितायां अधिकारोऽयं कर्णे लक्षणस्याविष्टाष्टपंचमणिभिन्नछि
न्नछिद्रस्रुवस्वस्तिकस्य कर्णशब्दे परे लक्षणवाचकस्य दीर्घः द्विगुणाकर्णः लक्षणस्य किं शोभनकर्णः अविष्टादीनां किं विष्टक
र्णः अष्टकर्णः मणिकर्णः भिन्नकर्णः छिन्नकर्णः छिद्रकर्णः स्रुवकर्णः स्वस्तिककर्णः नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ
क्विबंतेषु पूर्वपदस्य दीर्घः उपानत् नीवृत् प्रावृट् मर्मावित् नीरुक् अभीरुक् ऋतीषट् परीतत् क्वाविति किं परिणद्धं
वितायामु रूपइत्यतो मंडूकप्लुत्या वितायामनुवर्त्तते सा च व्यवस्थिता तेन गतिकारकयोरेव नेह पटुरुक् तिग्मरुक् वनगिर्योः
संज्ञायां कोटरकिंशुलकादीनां कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दीर्घः स्यात् संज्ञायां वने पुरगा मिश्रका सिध्रका
सारिका कोटरा येभ्यः वनशब्दस्योत्तरपदस्य णत्वमेव णत्वं न त्वन्येभ्यः इह कोटरान्ताः पंच दीर्घविधौ कोटरादयो बोध्याः तेषां कृ
तदीर्घाणां णत्वविधौ निर्देशोऽनित्यमार्थः अये शब्दस्य तु विधार्थः पु रगावणं मिश्रकावणं सिध्रकावणं सारिकावणं कोट
रावणं णत्वमेवेति किं असिपत्रवनं वनस्यायं अयेवणं राडदेतादिषु निपातनात् समस्या अनुक्त प्रातिपदिकार्थमात्रे प्रथ
मा किंशुलुकागिरिः वले वलप्रत्यये परे दीर्घः स्यात् संज्ञायां कृषीवलः मतौ बह्वचो नजिरादीनां अमरावती अनजिरादी
काष्ठेन कर्त्तरि तु कर्मवत्कर्मणा तुल्यक्रियः कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवत्स्यात् कार्यातिदेशोयं तेन
यक् आत्मनेपदे चिण् चिण्वदिटः स्युः कर्त्तरिति किं तत्वात् पूर्वमपाचि पच्यते ओदनः भिद्यते काष्ठं अपाचि अभेदि न तु तावे
लकारे कर्तुर्द्वितीयास्यात् अस्मात् तिदेशाद्धितिचेन्न लकारवाच्यकर्त्ताकर्मवत् लिड्यास्रिघाडितिद्धित्कारकाल ५६
इत्यनुवृत्तेः भावेप्रत्ययेचकर्तृकारणानुपस्थितेः अत एव कृत्यक्तखलर्थाः कर्मकर्त्तरि न तद्वितिकिं तु भावे एव तेन
व्यं कृष्टलेन न नुपविनिद्योः कर्मस्थाक्रियाविच्छित्तिर्द्विधास्तवनेव सेविदानीकर्तृस्था न तु तत्तुल्या सत्यं कर्मत्वकर्तृ राम०
त्वावस्थाभेदोपाधिकं तस्मात् समानाधिकरणक्रियाभेदमाश्रित्य व्यवहारः कर्मणेति किं करणस्यां तुल्यक्रियेपूर्वोक्ते

साध्यसिरित्यादौ मा भूत् किंच कर्तृस्थक्रियेभ्यो मा भूत् गच्छति ग्रामः आरोहति हस्ती अधिगच्छति शास्त्रार्थः स्मरति श्र
द्धाति च यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते यथा पक्केषु तण्डुलेषु यथा वा छिन्नेषु काष्ठेषु तत्र कर्मस्थक्रिया
नेतरत्र नहि पक्वापक्वतण्डुलविभागतया मेघवैलक्षण्यं उपलभ्यते करोति स्यादन्तार्थः इत्यत्र हि कर्मस्थत्वेनेनक
रिष्यते घटः इत्यादि यत्नार्थत्वे तु नेत सिध्येत् ज्ञानेच्छादिवत् यत्नस्य कर्तृस्थत्वात् एतेन अत्र च व्यवस्यमाने ध्ये इति व्या
ख्यातं कर्तृस्थत्वेन यगतावात् न्यपिनिक्तते तेलोपेवरूपसिद्धे ताभ्यां त्यादावध्यानज्ञानत्वादात्मनेपदं सकर्मकाणां
प्रतिषेधो वक्तव्यः अन्योन्यं स्पृशतः अश्लायामं नयति दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यं नदुहस्नुनमां यक्
चिणौ एषां कर्मकर्तरि यक् चिणौ नस्तः दुहेरनेन यक् एव निषेधः चिण्तु विकल्पेन भवते अदुग्ध की गौः पचो दु अव
:कर्मकर्तरि अङ्गं ताभ्यां चिण्वा स्यात् कर्मकर्तरि तङ्परे अकारि दुहस्य अदोहि पक्वे क्वः तुच्यते पक्वे दु क अ
दुग्ध अधक्षत उदुम्बरफलं पच्यते सृजियुज्योः श्यंस्तु अनयोः सकर्मकयोः कर्तुर्बहुलं कर्मवत्त्वं यगपवाद
श्च श्यन्वाच्य इत्यर्थः सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यं सृज्यते स्वयमेव श्रद्धया निष्पादयतीत्यर्थः असर्जि सु
ज्यते ब्रह्मचारी योगं भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात् भूषावाचिनां किरादीनां सनन्तानां च यक् चिणौ
चिण्वदिट्सं नेत्यर्थः अलंकुरुते कन्या अलमकृत अवकिरते हस्ती अवाकीष्ट गिरते अगीष्ट आद्रियते आद्
त किरादिस्तत्प्रायान्तर्गणः चिकीर्षते कटः अचिकीर्षिष्ट इच्छायाः कर्तृस्थत्वेऽपि करोति क्रियापेक्षं इह कर्मस्थक्रि
याद्वे तपः अस्मात् स्रुङ्चिण्न अवाहद्गोः कर्मकर्तरीत्येव अवरोधि गौर्गोपेन तपस्तपः कर्मकस्यैव कर्ता कर्म
वत्स्यात् विध्यर्थमिदम् एवकारस्तु व्यार्थः एवेति तस्य तु सारिणः तप्यते तपस्तापसः अर्जयतीत्यर्थः तपोनुतापे च ति चिण्नि

सि॰कौ॰ विधानत्वमित्युक्तम् अत एव तपः कर्मकस्येति किं उत्तपति सुवर्णं सुवर्णकारः नदुहस्नुनमां यक्चिणौ प्रस्नुते प्रास्ना
विष्ट प्रास्नोष्ट नमते दण्डः अनंस्त अत्र नाविति एपचिन्नमिः यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानं
कारयते अचीकरत उच्छ्रयते उदशिश्रियत ण्विदित्तु कारिष्यते उच्छ्रायिष्यते ब्रूते कथा अवोचत तारद्यड्डी
याः पचति णिश्रिग्रन्थिब्रूञामात्मनेपदाकर्मकाणामुपसंख्यानं पुच्छमुदस्यति उत्पुच्छयते गौः अत्र नाविति एपघंता
यां उत्पुच्छयते गौः पुनः कर्तृत्वविवक्षायां उत्पुच्छयते गौः उदपुपुच्छत यक्चिणोः प्रतिषेधाद्वेडो अपि ग्रन्थो राहु वा
न्लिङ्लावपक्षे यद्दणं ग्रन्थति ग्रन्थं अग्रन्थति मेखलां देवदत्तः ग्रन्थते ग्रन्थः अग्रन्थिष्ट ग्रन्थः अग्रन्थिष्ट क्र्यादिकयोस्त्व
घ्नीते अघ्नीत स्वयमेव विकुर्वते सैंधवाः वल्गन्तीत्यर्थः वेः कर्मणि कर्मकान्वेति तङ् अत्र नाविति ग्यर्थस्य पुनः प्रवृत्ता +ज्ञष्ट+
न विकुर्वते सैंधवाः व्यकारिष्ट व्यकारिषाताम् व्यकारिषत व्यकृत व्यकृषातां व्यकृषत कुषिरजोः प्राचां श्यन् पर
स्मैपदं च अनयोः कर्मकर्तरि श्यन् किं तु श्यन् परस्मैपदं वात्मनेपदापवादः कुष्यति कुष्यपोपवादः रज्यते रज्य
ते वस्त्रं श्यग्विषये तु नास्य प्रवृत्तिः कोषिषीष्ट रंक्षीष्ट इति कर्मकर्तृप्रक्रिया अभिज्ञावचने लृट् स्मृतिबोधिन्युप
पदे भूतानद्यतने धातोर्लृट् स्यात् लङोपवादः स्मरसि कृष्ण गोकुले वत्स्यामः एवं बुध्यसे चेतयसे इत्यादियोगेपि
तेषामपि प्रकरणादिवशेन स्मृतौ वृत्तिसंभवात् न यदि यद्योगे उक्तेन अभिजानासि कृष्ण यद्वनेऽभुञ्ज्महि वि ५७
भाषा साकाङ्क्षे उक्तविषये लृड्वा स्यात् लक्ष्यलक्षणभावेन साकाङ्क्षत्वे वार्थः स्मरसि कृष्ण गोकुले वत्स्यामः
तत्र गाश्चारयिष्यामः वासो लक्षणं चारणं लक्ष्यं पक्षे लङ् अवसाम अचारयाम यच्छब्दयोगेपि न यदीति बाधित्वा परत्वाद्विकल्पः परोक्षे
लिट् चकार उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं सुप्तोहं किल विललाप बकुडांगदसुरस्तास्यमत्ताकिला

हं अत्यंतापन्हवे लिड् वक्तव्यः कलिंगेस्वस्थास्त्रीः नाहं कलिंगान् जगाम ह शश्वतोर्लड् च अनयोरुपपदयोर्लिड् विषये
लङ् स्यात् चाल्लिट् इति हाकरोत् चकार वा शश्वदकरोत् चकार वा प्रश्ने चासन्नकाले प्रष्टव्यः प्रश्नः आसन्नकाले द
च्यमाने येलिड् विषये लङ् लिटौ स्तः अगच्छत् किं जगाम किं अनासन्ने तु कंसं जघान किं लट् स्मे लिटोपवादः यजति
स्म युधिष्ठिरः न अपरोक्षे च भूतानद्यतने लट् स्यात् स्मयोगे एवं स्म पिता ब्रवीति ननौ पृष्टप्रतिवचने अनद्यतनपरोक्ष
इति निवृत्तं भूते लट् स्यात् अकार्षीः किं ननु करोमि भोः नन्वोर्विभाषा अकार्षीः किं न करोमि नाकार्षं अहं नु करोमि
अहं न्वकार्षं पुरि लुङ् चास्मे अनद्यतनग्रहणं मंडूकप्लुत्यानुवर्तते पुराशब्दयोगे भूतानद्यतने विभाषा लुङ् चाल्लि
ट् न तु स्मयोगे पक्षे यथाप्राप्तं वसंतीह पुरा छात्राः अवात्सुः अवसन् ऊषुर्वा अस्मे किं यजति स्म पुरा त विषयीत्य
वृत्तमाने यावत्पुरानिपातयोर्लट् यावद्भुंक्ते पुरा भुंक्ते निपातावेतौ निश्चयं द्योतयतः निपातयोः किं यावद्दा
स्यति तावद्भोक्ष्यते करणभूतया पुरया यास्यति विभाषा कदाकर्ह्योः भविष्यति लट् स्यात् कदा कर्हि वा भुंक्ते भोक्ष्य
ते भोक्ता किंवृत्ते लिप्सायां भविष्यति लड् वा स्यात् कं कतरं कतमं वा भोजयसि भोजयिष्यसि भोजयितासि वा लिप्सा
यां किं कः पाटलिपुत्रं गमिष्यति लिप्स्यमानसिद्धौ च लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति
लड् वा स्यात् योऽन्नं ददाति दास्यति दाता वा स स्वर्गं याति यास्यति याता वा लोडर्थलक्षणे च लोडर्थः प्रैषादिर्लक्ष्य
ते येन तस्मिन्नर्थे वर्तमानाद्धातोर्भविष्यति लड् वा स्यात् कृष्णश्चेद्भुंक्ते गाः पालय पक्षे लृट् लृटौ लिड् चोर्ध्वमौहूर्ति
के ऊर्ध्वं मुहूर्ताद्भवं ऊर्ध्वमौहूर्तिकं निपातनात् समासः उत्तरपदवृद्धिश्च ऊर्ध्वमौहूर्तिके भविष्यति लोडर्थलक्ष
णे वर्तमानाद्धातोर्लिड् लटौ वा स्तः मुहूर्तात्परि उपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगंता वा अथ त्वं छं

हा०कौ० दोधीश्च वर्त्तमानसामीप्ये वर्त्तमानवद्वा समीपमेव सामीप्यं स्वार्थे ष्यञ् वर्त्तमाने लडित्यारभ्य उणादयो बहुलमिति
यावत् येनोपाधिना प्रत्ययास्तक्तास्ते तथैव वर्त्तमानसमीपे भूते भविष्यति च वा स्युः कदागतोऽसि अयमागच्छामि
अयमागमं कदागमिष्यसि एष गच्छामि गमिष्यामि वा आशंसायां भूतवच्च वर्त्तमानसामीप्य इति नानुवर्त्तते भवि
ष्यति काले भूतवद्वर्त्तमानवच्च प्रत्यया वा स्युः आशंसायां देवश्चेदवर्षीद्वर्षति वर्षिष्यति वा धान्यमवाप्स्म वपा
मः वप्स्यामो वा सामान्यातिदेशे विशेषानतिदेशः तेन लङ्लिटौ न क्षिप्रवचने लृट् क्षिप्रपर्याये उपपदे पूर्वविष
येऽलृट् स्यात् वृष्टिश्चेत् क्षिप्रमाशु त्वरितं वा यास्यति शीघ्रं वप्स्यामः नेति वक्तव्ये लृड्ग्रहणं लुटोपि विषये यथा
स्यात् श्वः शीघ्रं वप्स्यामः आशंसावचने लिङ् आशंसावाचिन्युपपदे भविष्यति लिङ् स्यात् न भूतवत् गुरुश्चेदुपे
यादाशंसे क्षिप्रमधीयीय नानद्यतनवत्क्रियाप्रबंधसामीप्ययोः क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ न यावज्जीव
मन्नमदात् दास्यति वा सामीप्यं तुल्यजातीयेनाव्यवधानं येयं पौर्णमास्यतिक्रांता तस्यामग्नीनाधित सोमेनाऽयष्ट
येयममावास्यागामिनी तस्यामग्नीनाधास्यते सोमेन यक्ष्यते भविष्यति मर्यादावचनेऽवरस्मिन् भविष्यति काले
मर्यादोक्तावरस्मिन्प्रविभागे नानद्यतनवत् योऽयमध्वा गंतव्य आपाटलिपुत्रात्तस्य यदवरं कौशांब्याः तत्र सक्तून्
पास्यामः कालविभागे चानहोरात्राणां पूर्वसूत्रं सर्वमनुवर्त्तते अहोरात्रसंबंधिनि विभागे प्रतिषेधार्थमिदं योगवि ५८
भाग उत्तरार्थः योऽयं वत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे अनहोरात्राणां किं योऽयं मास आ
गामी तस्य योऽवरः पंचदशरात्रस्तत्राध्येतास्महे परस्मिन् विभाषा अवरस्मिन् वर्ज्जे पूर्वसूत्रद्वयमनुवर्त्तते अप्राप्त
विभाषेयं योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे अध्येतास्महे लिङ्निमित्ते लृङ् क्रियातिप

तौ न विष्यतीत्येव सुहृच्छिन्द्रो दत्त विष्यत्तदा सुलैकमत्तविष्यत् लतेव ह्यर्थे सत्रेसंग्रहणे मनुवर्त्तते वोताप्योः वा आ उताप्यो-
रित्यतः प्राक्तने लिङ्निमित्ते लिङ्सप्तमी क्रियते ह्यर्थसूत्रे तु उताप्योरित्यादौ च वर्त्तत इति विवेकः गर्हायां लडपिजात्वोः
अत्रास्यां योगे लट् स्यात् कालत्रये गर्हायां लुङादीनामपवादत्वाद् बाधते अपि जायां त्यजसि जातु गणिकामादत्से गर्हितमे-
तत् विभाषा कथमि लिङ् च गर्हायामित्येव कालत्रये लिङ् वा लट् कथं धर्मं त्यजेः त्यजसि वा पक्षे कालत्रयजलकार-
त्वं अघत्त विष्यति नित्यलृङ् लतेवा कथं नाम तत्रभवान् धर्मं त्यजेत् किंवृत्ते लिङ्लृटौ गर्हायामित्येव विभाषा तु ना-
नुवर्त्तते कः कतरः कतमो वा हरिं निंदेत् निंदिष्यति वा लृङ्प्राप्त्यर्थं अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि गर्हायामिति नि-
वृत्तं अनवक्लृप्तिरसंभावनं अमर्षोऽक्षमा न संभावयामि न मर्षयामि वा भवान् हरिं निंदेत् निंदिष्यति वा कः कतरो वा ह-
रिं निंदेत् निंदिष्यति वा लृङ्प्राप्त्यर्थं किंकिलास्त्यर्थेषु लृट् अनवक्लृप्त्यमर्षयोरित्येतद्गर्हायां यावदनुवर्त्तते किंकिलेति
समुदायः क्रोधद्योतकमुपपदं अस्त्यर्थाः अस्ति भवति विद्यतयः लिङोपवादः न श्रद्दधे न मर्षये वा किं किल त्वं शूद्रान्नं भो-
क्ष्यसे अस्ति भवति विद्यते वा शूद्रं गमिष्यसि अवक्लृप्तु जातुयदोर्लिङ् यदाययोरुपसंख्यानं लृटोपवादः जातु यत् य-
दा यदि वा त्वादृशो हरिं निंदेत् नावकल्पयामि न मर्षयामि लृङ्प्राप्त्यर्थं यच्चयत्रयोः यच्च यत्र वा त्वमेवं कुर्याः न श्रद्दधे न म-
र्षयामि गर्हायां च अनवक्लृप्त्यमर्षयोरिति निवृत्तं यच्चयत्रयोर्योगे गर्हायां लिङ् स्यात् यच्च यत्र वा त्वं शूद्रं याजयेः अन्या-
य्यं तत् चित्रीकरणे च यच्च यत्र वा त्वं शूद्रं याजयेः आश्चर्यमेतत् शेषे लृड् अयदौ यत् यत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे
धातोर्लृट् स्यात् आश्चर्यमंधो नाम कृष्णं द्रक्ष्यति अयदौ किं यदि सोऽधीयीत उताप्योः समर्थयोर्लिङ् बाढमित्यर्थेऽनयोः क्लृप्त्या-
र्थता उत अपि वा हन्याद्घटं हरिः समर्थयोः किं उत दंडः पतिष्यति अपि धक्ष्यति द्वारं प्रश्नप्रच्छादनं चावगम्यते इतिः प्रस्व

सि॰कौ तिलिङ् मित्रं क्रियात् इति पक्षे लोट् तेपि नित्यो लृङ्: कामप्रवेदनेऽकच्चिति स्वाभिप्रायाविष्करणे गम्यमाने लिङ् स्यान्न तु
कच्चिति कामो मे भुञ्जीत भवान् अकच्चितीति किं कच्चिज्जीवति संभावनेऽलमिति चेत्सिद्धाप्रयोगे अलमर्थः त्रषे
द्वि: संभावनमिति अलमिति च द्वाभ्यां सम्बन्ध्याच्च विपरिणम्यते संभावनेऽर्थे लिङ् स्यात् तच्चेत्संभावनमलमिति
सिद्धाप्रयोगे सति अपि गिरिं शिरसा भिन्द्यात् सिद्धाप्रयोगे किं अलं कृष्णो हस्तिनं हनिष्यति विभाषा धातौ संभावनवच
नेऽयदि पूर्वसूत्रमनुवर्तते संभावनार्थधातावुपपदे लिङ् वा स्यान्न तु यच्छब्दे पूर्वेण नित्ये प्राप्ते वचने संभावयामि भुञ्जीत
भोक्ष्यते वा भवान् अयदि किं संभावयामि यद्भुञ्जीथास्त्वं हेतुहेतुमतोर्लिङ् वा स्यात् कृष्णं नमेच्चेत्सुखं यायात् कृष्णं
नंस्यति चेत्सुखं यास्यति भविष्यत्येवेष्यते नेह हन्तीति पलायते इच्छार्थे लिङ्लोटौ इच्छामि भुञ्जीत भुङ्क्तां वा भवान् एवं
कामये प्रार्थये इत्यादियोगे बोध्यं कामप्रवेदन इति वक्तव्यं नेह इच्छन् करोति लिङ् समानकर्तृकेषु इच्छार्थेषूपपदे
लिङ् स्यात् भुञ्जीयेतीच्छति इच्छार्थेभ्यो विभाषा वर्तमाने लिङ् स्यात् पक्षे लट् इच्छेत् इच्छति कामयेत कामयते विधिनि
मन्त्रणेति लिङ् विधौ यजेत निमन्त्रणे इह भुञ्जीत भवान् आमन्त्रणे इहासीत अधीष्टे पुत्रमध्यापयेद्भवान् संप्रसार
णे किं भो वेदमधीयीय उत तर्कं प्रार्थने भोजनं लभेय एवं लोट् प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च प्रैषो विधिः अतिसर्ग
: कामचारानुज्ञा भवता यष्टव्यं भवान् यजतां चकारेण लोटोऽनुकर्षणं प्राप्तकालार्थे लिङ्चोर्द्ध्वमौहूर्तिके प्रैषादयो ५९
ऽनुवर्तते मुहूर्तादूर्ध्वं यजेत यजतां यष्टव्यो स्मे लोट् पूर्वसूत्रस्य विषये लिङः कृत्यानां चापवादः ऊर्ध्वं मुहूर्त्तात् भवान् यज राम॰
तां स्म अधीष्टे च स्मे उपपदे अधीष्टे लोट् स्यात् वत्स अध्यापय लिङ् यदि यच्छब्दे उपपदे कालसमयवेलासु च लिङ् स्या
त् कालः समयो वेला वा यद्भुञ्जीत भवान् अर्हे कृत्यतृचश्च वा लिङ् त्वं कन्यां वहेः शकि लिङ् च शक्तौ लिङ् स्यात्

चोक्तत्वात्ः तथा ह्येवं वदेः माङि लुङ् माकार्षीः कथं मास्तवत्तु मा स्म विभ्यतीति नात्र माङ् किंतु मात्राऽस्य एव धातुसंबंधे प्रत्ययाः धात्व
र्थानां संबंधे यत्र काले प्रत्यया उक्ताः स्ततोन्यत्रापि स्युः तिङ् तवा व्यक्तिक्रियायाः प्राधान्यात्तदनुरोधेन गुणस्य तत्क्रियावाचि
न्यः प्रत्ययाः वसन्ददर्श स्त्रीलिङ् अतीतवासकर्तृकं दर्शनमर्थः सोमयाज्यस्य पुत्रो भविता सोमेन यक्ष्यमाणो यः
पुत्रस्तत्कर्तृकं भवनं क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात् तस्य च+
हिस्वौ स्तः तिङामपवादः तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः तिङ्संज्ञौ स्तः तध्वमोर्विषये तु हिस्वौ वा स्तः पु
रुषैकवचनसंज्ञौ तु नानयोरिति दिङ्मात्रे हिस्वविधानसामर्थ्यात् तेन सकलपुरुषवचनविषये परस्मैपदे स्यात् हि
: आत्मनेपदे स्वः सोऽपि च कर्मकर्तृषु समुच्चयेऽन्यतरस्यां अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात् यथा विधानु
प्रयोगः पूर्वस्मिन् आद्ये लोड्विधाने लोट् प्रकृतिस्तु तत एव धातोरनुप्रयोगः समुच्चये सामान्यवचनस्य समुच्चये लो
ड्विधौ सामान्यार्थस्य धातोरनुप्रयोगः स्यात् अनुप्रयोगाद्यथायथं लकारादयः लिङादस्तु ततः संख्याकालयोः पुरुषवि
शेषार्थस्य चाभिव्यक्तिः क्रियासमभिहारे द्वित्वं वाच्यं याहि याहीति याति पुनःपुनरतिशयेन वा यातीत्यर्थः एककर्तृ
कं वर्तमानं यानं यातीत्यस्य प्रतिज्ञा हि स्वस्तेदाविदेतात्पर्यमाहयति एवं यातः यान्ति यासि याथः याथ यात याते तित्रय
मं याथ याहि याहीत्ययासीत् यास्यति वा अधीष्व अधीष्वेति अधीते ध्वं विषये पक्षेऽधीध्वम् अधीध्वमिति अधीध्वे समुच्च
ये शाक्तून् पिब धानाः खादेत्यभ्यवहरति अन्नं भुंक्ष्व दधिकमास्वादयस्वेत्यभ्यवहरते तध्वमोस्तु पिबत खादतेत्यभ्यव
हरथः भुंग्ध्वं आस्वादध्वमित्यभ्यवहरध्वे पक्षे हिस्वौ अत्र समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्व
यः पक्षे शाक्तून् पिबति धानाः खादति अन्नं भुंक्ते दधिकमास्वादते एवं नपुरीमवस्कंद लुनीहि नंदनं मथाणस्त्रा

दिर+

...न्तकौ
...दीप २१९

निह्रामरांगनाः विगृह्यवक्रेन मुखि छिपावज्री यद्ध्वमस्यास्त्रीमद्दिविं दिवः इतिव्याख्यातं अवस्कंदनालवनादिस्
पास्ताननद्यतन परोक्षाएककर्तृका अस्याम्पुक्रियेत्यर्थात् इदंतुतः पुनश्चस्कंदेत्यर्थः इतिउव्याख्यानं स्नमम्लकमे
वद्वितीयस्त्रे क्रियासमभिहारे इत्यस्यानानुवृत्तेः लोमंत छिद्वापतेश्चपुरामवस्कंदेत्यादिमध्यमपुरुषैकवचनमित्यपिके
चां विद्रुमएवपुरुषवचनसंज्ञे इदमेत्यक्रवात् ॥इतिलकारार्थप्रक्रिया॥ समाप्ता॥ इतिलदीडीदीक्षितवि
रचितांसिद्धान्तकौमुद्यांतिङन्तं समाप्तम् ॥ सकलविवकवकवकवलिमदोपाध्यायश्रीपश्रीकनालमाग
रागणिशिष्यगणि ... गणश्रीशोभाणिक्यागमानगणिश्रीश्रीश्रीवाविदमागरगणिशिष्यगणिनाकेसर
सागरेणलिविवक्के॥ सकलपंडितशुकामध्ये श्रीपश्रीउत्तममसागरगणीनाचरणसहसपत्रस्मादि
दम्यात्॥ श्रीवावमीनगरे॥ संवत् १७२१ वर्षे शाडपदावदादेतेतरविष्ठानाकामबाध्या मिति श्रेयोस्तु ताव

॥ अथ कृदन्तम॥ धातोः आतृतीयसमाप्तेरधिकारोऽयं तत्रोपपदं सप्तमीस्थं कृदतिङ् वासरूपोऽस्त्रियां परिभाषेयं
अस्मिन् धात्वधिकारे सरूपोऽपवादः प्रत्ययः उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना कृत्याः अधिकारोऽयं ण्वुलः
प्राक् कर्त्तरि कृत् कृत्प्रत्ययः कर्त्तरि स्यादिति प्राप्ते तयोरेव कृत्यक्तखलर्थाः एते भावकर्मणोरेव स्युः तव्यत्तव्यानीयर
: धातोरेते प्रत्ययाः स्युः तकाररेफौ स्वरार्थौ एधितव्यं एधनीयं त्वया भावे औत्सर्गिकमेकवचनं क्लीवत्वं च चेतव्यश्चेत
नीयो वा धर्मस्त्वया वसेस्तव्यत् कर्त्तरि णिच्च वसतीति वास्तव्यः केलिमर उपसंख्यानं पचेलिमा माषाः पक्तव्याः भिदेलि
माः सरलाः भेत्तव्याः कर्मणि प्रत्ययः वार्त्तिकारस्तु कर्मकर्त्तरि चायमिष्यते इत्याह तन्नाष्यविरुद्धं कृत्यचः उपस
र्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात् प्रयाणीयं अचः किं प्रमग्नः निर्विण्णस्योपसंख्यानं अचः पर
त्वात्तावान्नकारव्यवधानाद्वाप्राप्ते वचनं परस्य णत्वं पूर्वस्य ष्टुत्वं निर्विण्णः णेर्विभाषा उपसर्गस्थान्निमित्तात्परस्य एपतादि
द्वितीयः कृत्स्थस्य नस्य णो वा स्यात् प्रयापणीयं प्रयापनीयं विहितविशेषणं किं प्रकोपवधानेपधास्यात् प्रयाप्यमाण
प्रयापणं उपसर्गत्वेनेत्यर्थं दुर्याणं दुर्यापनं हलश्चेजुपधात् हलादेरिजुपधात् कृत्स्थस्याचः परस्य णो वा स्यात् प्र
कोपणीयं प्रकोपनीयं हलः किं प्रोहणीयं इजुपधात् किं प्रपणीयं इजादेः सनुमः सनुमश्चेद्भवति इजादेर्हलन्तात्प्रिहि
तीयः कृत्स्थस्यैव प्रेङ्खणीयं इजादेः किं मगिसर्पणं प्रमङ्गनीयं नुम्ग्रहणमनुस्वारोपलक्षणं अट् कु ष्वाङ् इतिसूत्रेण्यैवं
तेननेह प्रेन्वनं इह उस्मादेव प्रेङ्खणं वानिंसनिंक्षनिंदा एषां नस्य णो वा स्यात् कृति परे प्रणिंसितव्यं प्रनिंसितव्यं न
भि तान् प्रकर्ण गमित्याद्यविषा एषः कृत्नस्य णो न प्रयावनीयं प्रयवनीयं ऋदृपवेहयहणमिष्यते इङ्स्तु प्रयपणी
यं सोमः एवं तावतादीनामुपसंख्यानं प्रयापनीयं वद्मानः उपस्य योषेस्यक्त एव प्रकरणोपरितष्ठोधं यव स्यामि

द्वेन आकारव्यवधानान्मणत्वं प्रख्यानीयं कस्य लुटो बकारं स्नातीनेने स्नानीयं तृणीदीयते संप्रदानीयो विप्रः अवोद
न अडं ताद्यातोर्णस्यात् वेदंडे यं अड्य इणं आक्यं मकर्तुम् योगविभागो प्येवं तथ्यदादि ष्वेवं मतो पिसुपवत्रा तइ
ष्यति यतिपरे आतइ स्यात् गुणः देयं लेयं तकि आसिवलिपतिडन्निस्योस्ववाच्यः तकं आमं चत्यं डनं डनेर्णच्छि
धिःस्वरार्थः एयं तापि रूपसिद्धेः नवद्दिप्रसंगः ऊ निवधो ष्ठ्यति निषेधात् इनोवायम्बधष्ठवकवाः वध्यः वदमाणे
एपन् घात्यतपोरनुपधात् पवर्गान्ताददुपधाद्यस्यात् एपतोपवादः आप्यं लभ्यं नानुबंतमसारूप्यं अतोनएपत् ववदा
दयस्कस्करेव आडोदि आड परस्य लभेर्नुम् स्यात् यादौ प्रत्यये विवक्षितेनुमि कृते अनुपधत्वात् तावाएयदेव आलं स्यो
गोः उपा स्वरांसाद्यो उपलभ्यः साधुः स्तुतोकिं उपलभ्या आक्यः उपलभ्यः आकिमदोष आक्यं सद्यं गदमदचरयम
श्चानुपसर्गे गद्यं मद्यं चर्यं वरेराडि वायुरे आचर्योदेआः गंतव्य इत्यर्थः अगुरौ किं आचार्योगुरुः यमन्नियमार्थं सो
पसर्गान्मास्तु दितिप्रयामं निपूर्वात्स्यादेव तेन न तत्र तत्त्वे वद्वि नियम्य मितिवार्त्तिक प्रयोगात् एतेन नियम्यस्य नात्पुक्ते
: प्रया नियम्या नद्दिवि चक्रुषेत्यादि व्याख्यानात् नियमेसाधुरिति अवद्यपण्यवर्यागर्ह्यपणितव्यानिरोधेषु वदेर्न
ञि उपपदेवदः सुपीतिचक्यपोः प्राप्तयो र्यदेवसो पिगर्ह्यामेवेष्टत यार्थं निपातनं अवद्यं पापं गर्ह्ये किं अनुद्यं गु
रुनाम तद्धि न गर्ह्यं न वनानर्ह्यं च आत्मनाम गुरोर्नाम नामाति कृपणस्य च श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयो
रितिस्मृतेः पण्या गोः व्यवहर्त्तव्येत्यर्थः याण्यमन्यत् स्तुत्यर्हमित्यर्थः अनिरोधो प्रतिबंधः तस्मिन्विषये वृङो यत् आ
तेन वृता कन्या वृत्याऽन्या वद्यकरणं वदं [illegible] मित्यर्थः भिवैत्रयोः क्र
गतो तस्मात् एपतोपवादः अर्यः स्वामीवैश्यपवा अनयोः किं आर्यो ब्राह्मणः प्राप्तव्य इत्यर्थः उपसर्याकाल्याप्रज

नेगमिग्रहणं प्राप्तकालावेदित्यर्थः उपसर्गायोगेः गत्यधिकारार्थेहचतेणोपगं तु योगे त्यर्थः प्रडीनेकाल्येति किं उपसर्गका
श्रीप्राप्तव्येत्यर्थः अडर्थसंगतं न अर्वाङ्गीयते: कर्त्तरिष्यसंगतं वेदितिशेषं नडीयर्थतीत्यडर्थे तेनसंगतमार्थेण रामा
डर्थेकस्तकृतमितिलढिः मृगोरडार्थेडारसोपदिष्टमदेह वेधात्यपुनर्बवधेत्यत्र संगतमितिविशेषणमध्याहार्यसंगतं किं
अडरिताकं बलः ताबेतुसंगतकर्टकेपिण्यदेव अडार्थसंगतेन वदः सुपिकाप्य उत्तरसूत्रादिह तावदित्याकर्षणेव
देर्ताविकल्प स्याद्धावत अनुपसर्गेसुष्फपदे उत्सोदंघ उत्सवद्धा उत्सवेदं तस्यावदनमित्यर्थः कर्मप्रत्यवस्यापित्येके उ
पसर्गेऽपि एपदेव अनुवादं अपवादं सुवोत्तावेकल्प स्यात् उत्सणोतावोत्सन्नत्यं सुपीत्येववक्तव्यं अनुपसर्गेष्वित्येव उत
वं इतस्तव अनुपसर्गेसुष्फपदेहं तेर्ताविकल्प स्यात् तकारांतादेशस्य उत्सणोहननेउत्सस्हत्यात्सीवंलोकात् एति
स्कन्नास्तू हजुषः कल्प एत्यः कल्प स्यात् कसस्यापितिकतिउक इत्यः स्कत्यः ज्ञास्तू इदं इ हलोः श्रिषः हइतिहत्रोयह
णं नहइः हत्यः हड स्कवार्थाकृषिडः आहत्यः जुषः उतः कल्पबुद्धिः परस्यापिण्यतोबाधनार्थः अवत्यस्कत्यः जोसि
इहित्युहित्स्योवेतिकाशिका ज्ञास्यं त्रास्यं उदस्यं दोस्यं उत्स्यं गोहस्य प्रज्ञास्यस्य प्रः ईडवंदहज्ञासउदात्यतइतिसूत्रदय
बलाद्वृत्तेः सिद्धं इतरयोस्कमह्लंमृगय आङ् एवंदिके संज्ञायामुपसंख्यानं अङ्वाक्किमहक्षणादिषु बाक्तलकरणे
कल्प अनिदितामितिन्लोपः आङ्गं ऋडुपधायाक्रपिहते: हत्यं हधृ हधं क्रपिहत्योस्क कल्प्या वर्त्यं तपरकरणं किं २
ह तत्कीर्त्यं अनित्यण्यंतासुरादयः इतिणिजावेण्यतः णिङंतात्तु यदेव ईचखनः वाक्यप्र आङुणः खेयं इवेतिक
संस्तुपवः तत्रोसंज्ञायां त्वत्याः कर्मकराः तर्हवाइत्यर्थः क्रियाज्ञाद्योवंनउसंज्ञा समस्तबक्तालंसंहत्यासंज्ञायां
संज्ञायामेव विकल्पार्थमिदं वार्तिकं असंज्ञायांकिं तायीनाम कृत्विया: अथक वंतापीवहृतिति इहहिसंज्ञायां

समङ्केति क्यपान्तावं संज्ञापर्युदासस्तु स्त्रियां चरितार्थः सत्यविभक्तेः स्वदृत्तिदीर्घान्ता आदेर्वा ल्यपत्र क्यप्तु स्वरश्रेरेव
तदनुबंधग्रहणे इति परिभाषया मृजेर्विभाषा मृजेः क्यप् स्यात् पक्षे ण्यत् मृज्यः चजोः कु घिण्ण्यतोः चस्य जस्य
चस्य कुत्वं स्यात् घिति ण्यति मृजेर्वृद्धिः मार्ग्यः न्यङ्क्वादीनां च कुत्वं स्यात् न्यङ्कुः नास्य कः राजसूयसूर्यमृषोद्यरु
च्यकुप्यकृष्टपच्याव्यथ्याः एते सप्त क्यबन्ता निपात्यन्ते राज्ञा सोतव्यो अभिषवद्वारा निष्पादयितव्यः यद्वा लता
त्मकः सोमो राजा सूयते कण्डूयते इति अधिकरणे क्यप् निपातनाद्दीर्घः राजसूयः राजसूयं अर्द्धर्चादिः सरत्या
काशे सूर्यः कर्तरि क्यप् निपातनाद्रुत्वं यद्वा प्रेरणे तुदादिः सुवति कर्मणि लोकं प्रेरयति क्यपो रुट् मृषोप
पदाद्वदेः कर्मणि क्यप् मृषोद्यं विशेष्यनिघ्नोऽयं उद्यतेऽसौ इदं दशगुणा मृषोद्याः रोचते रुच्यः गुपेरादेः कत्वं च सं
ज्ञायां सुवर्णरजतभिन्नं धनं कुप्यं कृष्टे स्वयमेव पच्यन्ते ते कृष्टपच्याः कर्मकर्तरि सिद्धे तु कर्मणि कृष्टपाच्याः न व्य
थतेऽव्यथ्यः सिध्यौ नक्षत्रे तिष्येः कन्नोश्च क्यप् उर्णो द्विवेव लिन लिकस्ते लिद्यः उक्तात्फलदकत्वाद्याः नदकिसेनाउक्तिता
पुष्यसिध्यौ नक्षत्रे अधिकरणे क्यब्निपात्यते पुष्यन्त्यस्मिन्नर्थाः पुष्यः सिध्यन्त्यस्मिन् सिध्यः विपूयविनीयजित्या मुञ्जकल्क
हलिषु पूङ् नीञ् जि एभ्यः क्यप् स्यात् विपूयो मुञ्जः रज्वादिकरणाय शोधयितव्य इत्यर्थः विनीयः कल्कः पिष्टऔषधवि
शेष इत्यर्थः पापमिति वा जित्यो हलिः बलेन कृष्टव्य इत्यर्थः कृष्टसमीकरणार्थं स्थूलकाष्ठं अन्यत्र विपव्यं विनेयं जे
यं प्रत्यपिभ्यां ग्रहेः छन्दसीति वक्तव्यं प्रगृह्यं अपिगृह्यं लोके ग्राह्यं अपिग्राह्यं पदास्वैरिबाह्यापक्ष्येषु च अवगृ
ह्यं प्रगृह्यं पदं अस्वैरी परतन्त्रे गृह्यकाः शुकाः पञ्जरादिबंधेन परतन्त्रीकृता इत्यर्थः बाह्यायां ग्रामगृह्या सेना ग्रामबहि
र्भूतेत्यर्थः स्त्रीनिर्देशात्स्त्रीत्वं समकोऽमे पक्षे भवः पक्ष्यः दिगादित्वाद्यत् आर्यैर्गृह्यते आर्यगृह्यः तत्पक्षाश्रित इ

त्यर्थः विसासाक्रुद्धयोः कथमस्मात् कृत्यं द्वयं पक्षे ऋहलोर्ण्यत् ऋवर्णान्ताद्धलंताच्च धातोर्ण्यत्स्यात् कार्यं वर्ध्यं युग्यं च पत्रे पत्रं
वाहनं युग्यो गौः अत्र क्यप् कुत्वं च निपात्यते अमावस्यदन्यतरस्यां अमोपपदाद्वसेरधिकरणे ण्यत् वृद्धेस्त्वं पाक्षिको
ऽस्य च निपात्यते अमासह वसतोऽस्यां चंद्रार्कौ अमावस्या अमावास्या ऋहलोर्ण्यत् चजोरिति कुत्वं पाक्यं पाणौ सृजेः
ण्यद्वाच्यः ऋदुपधलक्षणस्य क्यपोऽपवादः पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः समवपूर्वाच्च समवसर्ग्या कादेः कादधी
तोश्चजोः कुत्वेन गर्ज्यं वार्त्तिककारस्य चजोरिति सूत्रे निष्ठायामनिट इति हरविधानकादरित्यादि प्रत्याख्यातो तेनात्र
र्जितर्जिप्रभृतीनां न कुत्वं निष्ठायां सेट्त्वात् न्युब्जभुब्जप्रभृतीनां तु कादित्वेऽपि कुत्वं स्यादेव सूत्रकारमते तु यद्यपि वि कुत्वं*
परीतं प्राप्तं तथापि यथोत्तरं मुनीनां प्रामाण्यं अजिव्रज्योश्च न समाजः परिव्राजः भुजन्युब्जौ पाण्युपतापयोः एतयो
रेतौ निपात्यौ भुज्यतेऽनेनेति भुजः पाणिः हलश्चेति घञ् न्युब्जन्त्यस्मिन्निति न्युब्जः उपतापो रोगः पाण्युपतापयोरि
ति किं भोगः समुद्गः प्रयाजानुयाजौ यज्ञाङ्गे पंचप्रयाजाः त्रयोऽनुयाजाः यज्ञाङ्गे किं प्रयागः अनुयागः वञ्चेर्गतौ
वञ्च्यं वञ्च्यं गतौ किं वंक्यं काष्ठं कुटिलीकृतमित्यर्थः ओक उचः के उचेर्गुणः कुत्वं निपात्यते के परे ओकः शकुन्तवृषलौ
इगुपधलक्षणः कः घञ्सिद्धे अन्तोदात्तार्थमिदं ण्य आवश्यके कुत्वं न अवश्यपाच्यं यजयाचरुचप्रवचर्चश्च ण्ये कुत्वं न
याज्यं याच्यं रोच्यं प्रवाच्यं ग्रंथविशेषः ऋच्यं अर्च्यं ऋदुपधत्वेऽपि अत एव ज्ञापकात् ण्यत् त्यजेश्च त्याज्यं हज्यं त्यजि हज्यो २
श्चेति काशिका तत्र हठेर्यद्धरणि चिंत्यं भाष्यानुक्तत्वात् ण्यत्प्रकरणे त्यजेरुपसंख्यानमिति हि भाष्यं वचोऽशब्दसंज्ञायां
वाच्यं शब्दसंज्ञायां तु वाक्यं प्रयोज्यनियोज्यौ शक्यार्थे प्रयोक्तुं शक्यः प्रयोज्यो नियोज्यो भृत्यः योज्यं स्याद्वा योग्यमन्य
त्र ण्यत्प्रकरणे विदिधिनिषिद्धं वेति वक्तव्यं लाघ्यं दलिविद्भिः पिपठिते वार्त्तिकबला स्वीकारः दास्यः तवावश्यके उवर्णा

ताद्धातोर्ण्यत्स्यात् अवश्यंभावे द्योत्ये लाव्यं पाव्यं आसुयुवपिरपित्रपिचमश्च उक्त आसाव्यं यु मिश्रणे याव्यं वाप्यं राप्यं त्राप्यं आचाम्यं आनाय्योऽनित्ये आङ्पूर्वान्नयतेर्ण्यदायादेशौ निपात्यते दक्षिणाग्निविशेषश्चेदेवं स हि गार्हपत्यादानीयते अनित्यश्च सततमप्रज्वलनात् आनेयोऽन्यः घटादिः वैश्यकुलादेरानीतो दक्षिणाग्निश्च प्रणाय्योऽसम्मतौ सम्मतिः प्रीतिविषयीभवनं कर्मव्यापारः तथा लोके ब्राह्मदरेऽपि सम्मतिः प्रणाय्यश्चोरः प्रीत्यनर्ह इत्यर्थः प्रणाय्योऽन्तेवासी विरक्त इत्यर्थः प्रणेयोऽन्यः पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु मीयतेऽनेनेति पाय्यं माने ण्यत् धात्वादेः पश्च आतो युक्...रिति युक् सम्यक् नीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविर्विशेषः ण्यदायादेशः समो दीर्घश्च निपात्यते निचीयतेऽ[illegible]स्मिन् धान्यादिकं निकाय्यो निवासः अधिकरणे ण्यत् आय् धात्वादेः कत्वं च निपात्यते धीयतेऽनया समिदिति धाय्या ऋक् क्रतौ कुण्डपाय्यसंचाय्यौ कुण्डेन पीयतेऽस्मिन्सोमः कुण्डपाय्यः क्रतुः संचीयतेऽसौ संचाय्यः अग्नौ परिचाय्योपचाय्यसमूह्याः अग्निधारणार्थे स्थलविशेषे एते साधवः अन्यत्र तु परिचेयं उपचेयं संचाय्यं चित्याग्निचित्ये च चीयतेऽसौ चित्योऽग्निः अग्नेश्चयनमग्निचित्या प्रैषादिसर्गप्राप्तकालेषु कृत्याश्च भवता गन्तव्यं गमनीयं गम्यं इह लोटा बाधा मा भूदिति पुनः कृत्यविधिः अधिकारादूर्ध्वं वासरूपविधिः क्वचिन्नेति ज्ञापयितुं तेन क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नेति सिद्धं अर्हे कृत्यतृचश्च स्तोतुमर्हः स्तुत्यः स्तुतिकर्म स्तोता स्तुतिकर्ता लिङा बाधा मा भूदिति पुनः कृत्यतृचोर्विधिः भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा एते कृत्यान्ताः कर्तरि वा निपात्यन्ते पक्षे तद्योगविधिरिति सकर्मकाकर्मकेभ्यः अकर्मकात्तु भावे ज्ञेयाः भवतीति भव्यः भव्यमनेन वा गायतीति गेयः साम्नामयं गेयं साम अनेन वा इत्यादि शकि लिङ् च चात्कृत्याः वोढुं शक्यो वोढव्यः वहनीयो

वावाच्यः लिङ्गबाधमात्रादितिकस्योक्तिः लोप्यवादनेनैवज्ञापनसंलवैर्वेषादिसूत्रे कृत्याश्चेतिसुत्यडं अर्हे कृत्यतृच्वा
ग्रहणं इतिकस्य प्रक्रिया ण्वुल्तृचौ धातोरेतौ स्तः कर्तरिकृदितिकर्त्रर्थे युवोरनाकौ कारकः कर्ता बाहुमहीवोढा
वोकारिका कर्त्री गाङ्कुटेतिङित्वं कुटिता अज्ञिणिदित्यत्र क्ङिनेतिङित्वं कोटकः विजइट् विजिता हनस्तोचिण्णलोः घात
कः दायकः नोदात्तोपदेशस्येतिन वृद्धिः शमको दमकः जनिवध्योश्च जनकः वधहिंसायां वधकः रधिजभोरचि रंध
कः जंभकः नेड्वशिकृति रधिता रद्धा मस्जिनशोरितिनुम् मंक्ता नंष्टा नशिता रजेर्नलोपः रंजकः रंक्ता लभेश्च लंभक
:लब्धा तोषसहप्पिता तृष्टा सहिता सोढा दरिद्रातेरालोपः दरिद्रिता ण्वुलि तु दरिद्रायकः कृत्यल्युट इत्येवसूत्रमस्तु
यत्रविहितस्ततोन्यत्रापिस्फुरित्यर्थात् एवंचबहुलग्रहणंयोगविभागेनकृत्स्नमात्रस्य अर्थव्यभिचारार्थं पादास्यां क्रियते
पादहारकः कर्मणि ण्वुल् कमेःकर्त्रर्यात्मनेपदविषयात् कृतइण्णिषेधोवाच्यः प्रक्रंता कर्त्तरीति किं प्रक्रमितव्य
मात्मनेपदे किं संक्रमिता अनन्यत्वविषयाः नाद्ये तेनोपसर्गाद्वेति विकल्पादेर्स्यन निषेधः क्रमितालटईत्वमेवतु
द्विविषये तेनक्रंतेत्यपीतिकेचित् क्रमेशिडित्यत्रपरस्मैपदग्रहणं तङानयोरभावे भवति क्तिङिगमिषिता एवंनर्त
ष्ठग्रवर्त्यः विवक्षिता लंगंता ण्वुल् अल्लोपस्यस्थानिवत्वान्नवृद्धिः पापचकः यङ्लुगंतात्तु पापाचकः नंदिग्रहिपचादि
भ्योल्युणिन्यचः नंद्यादेर्ल्युः ग्राहादेर्णिनिः पचादेरच् स्यात् नंदयतीतिनंदनः जनमर्दयतीतिजनार्दनः मधुसूदनः ८
विशेषेणभीषयतेइतिविभीषणः लवणः नंद्यादेर्गणेनिपातनात्सत्वं ग्राही स्थायी मंत्री विशायी वासी निपातन
न्नविषयी इह षत्वमपिपरिताली परित्तर्दी पादिकोटयोमाविनिपात्यते पचादिराकृतिगणः शिवशमरिष्टस्यकरे
कर्मण्युपपदे वच् इति सूत्रे ओःकरोतेर्घटश्च अस्य योगात् अव्युत्पत्तेपरेमद्लुक् विधानाच्च केचित्स्वात्ममस्कंश्च तु वेधा

संज्ञानार्थः केषांचित्स्वपचार्थः केषांचिद्बाधकबाधनार्थः पचतीति पचः नदट् चोरट् देवट् इत्यादयष्टितः नदी चोरी दे
वी देवयते[illegible]पचेति कः प्राप्तः ज्ञारहराणपचा अनयोः कर्मण्यणः प्राप्तः नकादिषु पाठोऽप्युपाकोऽपि चडो विवेतिलु
६४ क्त नधाश्चलोपैतिगुणो वृद्धिश्च निषेधः वेक्कितः नेन्यः लोलुवः पोपुवः मरीमृजः चरिचलिपतिवदीनां वाद्वित्वमच्या
क्वाभ्यासस्येति वक्तव्यं आगमस्य दीर्घत्वसामर्थ्यादभ्यासकार्यो हलादिशेषश्च न चराचरः चलाचलः पतापतः वदा
वदः हन्तेर्घत्वं च घत्वमभ्यासस्य उत्तरस्य तु अभ्यासाच्चेति कुत्वं घनाघनः पाटेर्णिलुक्कोकश्च दीर्घश्चाभ्यासस्य पाटूपट
: पक्केचरः चलः पतः वदः हनः पाटः रात्रेः कृतीति वा तुमम्न रात्रिंचरो रात्रिंचरः इगुपधज्ञाप्रीकिरः कः एषः कः स्या
त् क्षिपः लिखः बुधः कृशः ज्ञः प्रीणातीति प्रियः किरतीति किरः वासरूपविधिना ण्वुलत्वचावपि क्षेपकं क्षेपा आतश्चो
पसर्गे कः स्यात् प्रातादयवधे तिपास्यापदाः दः सुग्लः प्रज्ञः पाघ्राध्माधेट्दृशः शः शः पिबतीति पिबः जिघ्रः धमः धयः धयाक
न्या धेटष्टित्वात्स्तनंधयीति स्तनंधयी वडीमीमः खवशोत्राप्नेष्यत इति हरदत्तः पश्यतीति पश्यः शः संज्ञायां न व्याघ्रादिति
ति निर्देशात् अनुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च शः स्यात् लिंपः विंदः धारयः पारयः वे
दयः उदेजयः चेतयः सातिः सुखार्थः सौत्रो हेतुमण्यन्तः सातयः वासरूपन्यायेन क्विप्स्यात् परमात्मा सांहतो न कः स
हः सर्वलिंपुराविः हेतुमत्यन्तो वा साहयः अनुपसर्गात्किं प्रलिपः नौ लिपेर्वाच्य निलिंपा देवाः गवादिषु विदेः संज्ञायां गो
विंदः अरविंदः ददातिदधात्योर्विभाषा शः स्यात् ददः दधः पक्षे वक्ष्यमाणो णः अनुपसर्गादित्येव प्रदः प्रधः ज्वलितिक
संतेभ्यो णः इति वा शो आ घर्षः ज्वलादिभ्यः कर्मवेत्यस्य णः स्याद्वा पक्षेऽच् ज्वालः ज्वलः चालः चलः अनुपसर्गादित्येव
उज्ज्वलः तनेरुपसंख्यानं इहानुपसर्गादिति विभाषेति च न संबध्यते अवतनोतीत्यवतानः श्याद्व्यधास्रुसंस्रवती ण

वसावहलिहश्लिषश्वसश्च ञोड् प्रवृत्तिस्योनित्यं णः स्यात् ञ्येडोः वस्यतेश्चादंतत्वात्सिद्धे: इषग्रहणं उपसर्गे किंबाधितं
अवन्नायः प्रतिन्नायः आत् दायः धायः व्याधः सुगतौ आङ् पूर्वो सुः पूर्वश्च आस्रावः संस्रावः अत्यायः अवसायः अव
हारः लेहः श्लेषः श्वासः दुन्योरनुपसर्गे णः स्यात् दुनोतीति दावः नीसारः वर्षाः सात्तु बंधकाद्दुनोतेरेव णः इवतेस्तु पचा
द्यच् दवः नयतीति न्यायः उपसर्गेतु प्रदवः प्रणयः विभाषाग्रहः णो वा पक्षे च व्यवस्थितविभाषेयं तेन कुलवरग्राहः
ज्योतिषिग्रहः नवतेश्चेति काशिका नवो देवः संसारस्य नावाः पदार्थाः माध्यमते तु प्राप्त्यर्थाच्चुरादिण्यंतादच् नावः गे
हे कः गेहे कर्तरि गृहे कः स्यात् गृह्णाति धान्यादिकमिति गृहं तत्स्थाः गृहा दाराः शिल्पिनि ष्वुन् क्रियाकौशलं शिल्पं त
द्वति कर्तरि ष्वुन् स्यात् नृतिखनिरंजिभ्य एव नर्तकी खनकः खनकी असिद्धवत्केऽनेरंजेर्नलोपो वाच्यः रजकः रजकी
माध्यमते तु नृतिखनिभ्यामेव ष्वुन् रंजेस्तु कुरशिल्पिसंज्ञयोरिति वुन् टाप् रजिका पुंयोगे तु रजकी गःस्थकन् गा
यतेस्थकन् स्यात् शिल्पिनि कर्तरि गाथकः ण्युट् च गायनः टित्वात् ङीप् गायनी हश्च व्रीहिकालयोः हाको हाङश्च ण्युट् स्या
त् व्रीहौ काले च कर्तरि जहात्युदकमिति हायना व्रीहिः जहाति सत्त्वानिति पुरो हायनो वर्षः जिहीते प्राप्नोति वा प्रुसृल्व
:समभिहारे वुन् समभिहारग्रहणेन साधुकारित्वं लक्ष्यते प्रवकः सरकः लवकः आशिषि च आशीर्विषयार्थवृत्तेर्धा
तोर्वुन् स्यात्कर्तरि जीवतात् जीवकः नंदतात् नंदकः आशीः प्रयोक्तृधर्मः आशास्तिः पित्रादेरिष्टसिद्धिः कर्मण्य ५
ण् कर्मणि उपपदे धातोरण् प्रत्ययः स्यात् उपपदसमासः कुंभं करोतीति कुंभकारः आदित्यं पश्यतीत्यादौ अनभि
धानान्न शीलिकामिभक्ष्याचरिभ्यो णः अणोपवादार्थं वार्तिकं मांसशीला मांसकामा कल्याणाचारा ईक्षिक्षमिभ्यां
च सुखप्रतीक्षा बहुक्षमा कर्मवद्दिंगं गाधरः तद्धरादयः कर्मणः शेषत्वविवक्षायां तत्वेऽपि क्त्वा वा भक्ष्य अण् स्यात्

कापवादः स्वर्गह्वायः तंतुवायः धान्यमायः आतोनुपसर्गे कः आदंताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यान्नाण् आ
तोलोपः गोदः पार्ष्णित्रं अनुपसर्गे किं गोसंदायः कविधौ सर्वत्रप्रसारणिभ्योडः ब्रह्मजिनाति ब्रह्मज्यः सर्वत्रग्रह
णात् आतश्चोपसर्गे आह्वः प्रह्वः सुपिस्थः सुपीतियोगो विभज्यते सुपि उपपदे आदंतात्कः स्यात् द्वाभ्यां पिबतीति
द्विपः समस्थः विषमस्थः ततः स्थः सुपि तिष्ठतेः कः स्यात् आरंभसामर्थ्याद्भावे आखूनामुत्थानं आखूत्थः प्रष्ठोग्रगामि
नि प्रतिष्ठत इति प्रष्ठो गौः अग्रतोगच्छतीत्यर्थः अग्रेति किं प्रस्थः अंबाम्बगोस्रुमिसच्यापद्वित्रिकुशेकुशंक्वंगुमं
जिपुंजिपरमेबर्हिर्दिव्यग्निभ्यः स्थः स्थइति कृतषत्वस्यानुकरणं षष्ठ्यर्थे प्रथमा एभ्यः स्थस्य सस्य षः स्यात् द्विष्ठः
त्रिष्ठः इतऊर्ध्वं कर्मणि सुपीति द्वयमप्यनुवर्तते तत्राकर्मके सुपि सुपीत्यस्य संबंधः तुंदशोकयोः परिमृजापनुदोः तुं
दशोकयोः कर्मणोरुपपदयोरेताभ्यां कः स्यात् आलस्यसुखाहरणयोरिति वक्तव्यं तुंदं परिमार्ष्टीति तुंदपरिमृजोऽ
लसः शोकापनुदः सुखस्याहर्ता अलसादन्यत्र तुंदपरिमार्ज एव शोकसंसारापारत्वोपदेष्टोन शोकमपनुदति
स शोकापनोदः कप्रकरणे मूलविभुजादिभ्य उपसंख्यानं मूलानि विभुजति मूलविभुजो रथः आकृतिगणो
यं महीध्रः कुध्रः गिलतीति गिलः प्रेदाज्ञः दाज्ञाभ्यां प्रोपसृष्टाभ्यां कर्मण्युपपदे कः स्यात् अणोपवादः सर्वप्र
दः पथिप्रज्ञः अनुपसर्ग इत्यनुवृत्तेः प्रादन्यत्रेति गोसंप्रदायः समिख्यः गोसंख्यः गापोष्टक् अनुपसृष्टाभ्यामाभ्यां टक्
स्यात् कर्मण्युपपदे सामगः सामगी उपसर्गे तु सामसंगायः पिबतेः सुराशीध्वोरिति वाच्यं सुरापी शीधुपी अन्य
न्यत्र क्षीरपा ब्राह्मणी सुरां पातीति सुरापा हरतेरनुद्यमनेच अंशहरः अनुद्यमने किं भारहारः शक्तिलां
गलांकुशयष्टितोमरघटघटीधनुष्षु ग्रहेरुपसंख्यानं शक्तिग्रहः लांगलग्रहः सूत्रेच धार्यर्थे सूत्रग्रहः यस्कस्र

त्रे केवलमुपपदत्वेनतु धारयतीति तत्राणेवास्य त्र्याहः वयसि च उद्यमनार्थं सूत्रे कवचहरः कुमारः आङि ताच्छील्ये पु
ष्पाण्याहरतीति तच्छीलः पुष्पाहरः ताच्छील्ये किं भाराहारः अर्हः अर्हतेरच् स्यात् कर्मण्युपपदे णोपवादः पूजार्हा ब्राह्मणी ।
स्तम्बकर्णयो रमिजपोः हस्तिसूचकयोरिति वक्तव्यं स्तम्बेरमते स्तम्बेरमो हस्ती तस्तुस्पेजतीति रलंदं ताद्दिति वाडे रखु
रू कर्णेजपः सूचकः शमि धातोः संज्ञायां शंसवः शंवदः पुनर्धातुग्रहणं बाधकविषयेपि प्रवृत्त्यर्थं कृञो हेत्वादि
षु टो मा भूत् शंकरा नाम परिव्राजिका तच्छीला अधिकरणे शेतेः खे शेते खशयः पार्श्वादिषूपसंख्यानं पार्श्वाभ्यां शे
ते पार्श्वशयः पृष्ठशयः उदरेण शेते उदरशयः उत्तानादिषु कर्तृषु उत्तानः शेते उत्तानशयः अवमूर्धशयः अवनतो
मूर्धा यस्य स अवमूर्धा अधोमुखः शेते इत्यर्थः गिरौ डश्छन्दसि गिरौ शेते गिरिशः कथं तर्हि गिरिशमुपचचार प्रत्यहं सा सु
केशी गिरिरस्यास्तीति लोमादित्वाच्छः चरेष्टः अधिकरणे उपपदे कुरुचरः कुरुचरी भिक्षासेनादायेषु च भिक्षां चरती +चरतिति+
ति भिक्षाचरः सेनाचरः आदायेति ल्यबन्तं आदायचरः पेद्धित्वात् सहचरीति कथं पचादिषु पाठात् पुरोऽग्रतोऽग्रेषु सर
तेः पुरःसरः अग्रतःसरः अग्रसरः अग्रे सरतीत्यग्रेसरः सूत्रे एदिति एदन्तत्वमपि निपात्यते कथं तर्हि यूथं तदग्रसरगवि
तःकस्मात्सारमिति बाहुलकादिति हरदत्तः पूर्वे कर्तरि कर्तृवाचिनि पूर्वशब्दे उपपदे सरतेष्टः स्यात् पूर्वः सरती
ति पूर्वसरः कर्तरि किं पूर्वं देशं सरतीति पूर्वसारः कृञो हेतुताच्छील्यानुलोम्येषु एषु द्योत्येषु करोतेष्टः स्यात् अतः कृ ६
कमीति सः यशस्करी विद्या श्राद्धकरः वचनकरः दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलि
बिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु एषु कृञष्टः स्यात् अहेत्वादावपि दिवाकरः विभा
करो निशाकरः कस्मादिवाशः भास्करः बहुकरः अहस्य विगृह्यार्थं संख्यापेक्षाष्टग्रहणं लिपिलिबिशाद्धेपर्या

यौ संख्या एककरः द्विकरः कस्मादिवादस्करः नित्यंसमासेनुत्तरपदस्थस्येति षत्वं धनुष्करः किंयत्तद्बहुषु कृञो
ऽज्विधानमिति वार्त्तिकं किंकरा यत्करा तत्करा दिवादिटं बाधित्वा परत्वादच् पुंयोगे ङीष् किंकरी कर्मणि भृतौ
कर्मण्युपपदे करोतेष्टः स्यात् कर्मकरो भृतकः कर्मकारोऽन्यः न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्र
पदेषु एषु कृञष्टो न स्यात् हेत्वादिषु प्राप्तः प्रतिषिध्यते शब्दकार इत्यादि स्तम्बशकृतोरिन् व्रीहिवत्स
योरिति वक्तव्यं स्तम्बकरिर्व्रीहिः शकृत्करिर्वत्सः अनयोः किं स्तम्बकारः शकृत्कारः हरतेर्दृतिनाथयोः पशौ दृ
तिनाथयोर्हरतेरिन् स्यात् पशौ कर्त्तरि दृतिं हरतीति दृतिहरिः नाथं नासारज्जुं हरतीति नाथहरिः पशौ किं नाथ
हारः दृतिहारः फलेग्रहिरात्मम्भरिश्च फलानि गृह्णातीति फलेग्रहिः उपपदस्य एदन्तत्वं ग्रहेरिन् प्रत्ययश्च निपा
त्यते आत्मानं बिभर्तीति आत्मम्भरिः आत्मनो मुमागमः कुक्षिम्भरिश्च वाकुक्षिंभरिः चकारादात्मोदरकुक्षिषु
ति पेठुः ... कौराः इति मुरारिः एजेः खश् एजयतेः खश् स्यात् अरुर्द्विषदजन्तस्य
मुम् अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात् खिदन्ते उत्तरपदे न त्वव्ययस्य शित्वाच्छबादिः जनमेजयतीति जनमे
जयः वातशुनीतिलशर्धेष्वजधेट्तुदजहातीनामुपसंख्यानं वातमजा मृगाः खित्यनव्ययस्य खिदन्ते उप
पदे पूर्वपदस्य ह्रस्वः स्यात् ततो मुम् शुनिन्धयः तिलन्तुदः शर्धञ्जहा माषाः शर्धोऽपानशब्दः तेन जहतीति विग्रहः ज
हातेरन्तलोपश्च नासिकास्तनयोर्ध्माधेटोः अत्र वार्त्तिकं स्तनेधेट इति वक्तव्यं नासिकायां ध्मश्च एतयोः कर्मणो
रुपपदयोर्ध्माधेटोः खश् स्यात् घासंख्यानेष्यते नासिंधमः मुष्टिंधयः नासिंधमः स्तनंधयः मुष्टिंधमः मुष्टिंधयः घटि
खारीखारीषूपसंख्यानं घटिंधयः घटिंधमः इत्यादि खारी परिमाणविशेषः खारीमर्दती उदि कूले रुजिवहोः उ

त्सर्वत्त्यां रुजिवहिस्यां कूले कर्मण्युपपदे खश् स्यात् कूलमुद्रुजतीति कूलमुद्रुजः कूलमुद्वहः वहाभ्रे लिहः वह
:स्कंधस्तं लेढीति वहंलिहो गौः अदादित्वाच्छपो लुक् खशो ङित्वान्न गुणः अभ्रंलिहो वायुः परिमाणे पचः प्रस्थंपचा स्था
ली खारीपचः कटाहः मितनखे च मितंपचा ब्राह्मणी नखंपचा यवागूः विध्वरुषोस्तुदः विधुंतु
दः मुमि संयोगांतलोपः अरुंतुदः असूर्यललाटयोर्दृशितपोः असूर्यमिति असमर्थसमासः दृशिना नञः संब
धात् सूर्यं न पश्यंतीति असूर्यंपश्या राजदाराः ललाटंतपः सूर्यः उग्रंपश्येरंमदपाणिंधमाश्च एते निपात्यंते उग्र
मिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश् उग्रंपश्यतीत्युग्रंपश्यः इरा उदकं तेन माद्यति दीप्यते: विंधनवा
दिति इरंमदो मेघज्योतिः इह निपातनात् श्यन्न पाणिंध्मो ध्मा धमंते अस्मिन्निति पाणिंधमो ध्वा अंधकाराद्याव्हैतद्
त्यर्थः तत्र हि सर्पाद्यपानादाप्पाणयः शा वाते प्रियवशे वदः खश् प्रियंवदः वशंवदः गमेः सुपि वाच्यः असंज्ञा
र्थमिदं मितंगमो हस्ती विहायसो विह इति वाच्यं खच्च डिद्वा वाच्यः विहंगमः विहंगः भुजंगमः द्विषत्परयोस्तापे
खच् स्यात् खचि ह्रस्वः खच्परे णौ उपधाया ह्रस्वः स्यात् द्विषंतं परं वा तापयतीति द्विषंतपः घटघटीग्रहणाल्लिंगवि
शिष्टपरिभाषा अनित्या तेनेह न द्विषतीं तापयतीति द्विषतीतापः वाचिंयमो व्रते वाक्शब्दे उपपदे यमेः खच्
स्यात् व्रते गम्ये वाचंयमश्चरेदेव वाक्शब्दस्य अमंतत्वं निपात्यते वाचंयमो मौनव्रती व्रतेति किं अत्राक्यादिना वा ७
चं यच्छतीति वाग्यामः पूःसर्वयोर्दारिसहोः पुरंदारयतीति पुरंदरः सर्वंसहः सहिग्रहणमसंज्ञार्थं भगे च दारेरिति
काशिका वार्तिके न दृष्टमिदमित्याहुः भगं दारयतीति भगंदरः सर्वकूलाभ्रकरीषेषु कषः सर्वंकषः खलः कू
लंकषा नदी अभ्रंकषो वायुः करीषंकषा वात्या मेघर्तिभयेषु कृञः मेघंकरः ऋतिंकरः भयंकरः भयशब्देन तदंत

विधिः अभयंकरः क्षेमप्रियमद्रेऽण् च एभ्यः कृञोऽण् स्यात् चात् खच् क्षेमंकरः क्षेमकारः प्रियंकरः प्रियकारः मद्रंक
रो मद्रकारः वेतिवाच्ये अण्ग्रहणं हेत्वादिषु टो मा भूदिति कथं तर्हि अल्पारंभाः क्षेमकारा इति कर्मणः शेषत्वविव
क्षायां भविष्यति आशिते भुवः करणभावयोः आशितशब्दे उपपदे भवतेः खच् स्यात् आशितो भवत्यनेनाशि
तंभवः ओदनः आशितस्य भवनं आशितंभवः संज्ञायां भृतृवृजिधारिसहितपिदमः विश्वं बिभर्तीति विश्वं
भरः विश्वंभरा रथंतरं साम इदं रथेन तरंतीति व्युत्पत्तिमात्रं न त्ववयवार्थानुगमः पतिंवरा कन्या शत्रुंज
यो हस्ती युगंधरः पर्वतः शत्रुंसहः शत्रुंतपः अरिंदमः दमिः शमनार्थो तेन सकर्मक इत्येकं मतांतरे तु अ
न्तर्भावितण्यर्थो दमिः गमश्च सुतंगमः अंतात्यंताध्वदूरपारसर्वानंतेषु डः संज्ञायामिति निवृत्तं एषु गमेर्डः स्यात्
डित्वसामर्थ्यात् अभस्यापि टेर्लोपः अंतं गच्छतीति अंतगः इत्यादि सर्वत्रपन्नयोरुपसंख्यानं सर्वत्रगः पन्नेप
ति गच्छतीति पन्नगः पन्नमिति पद्यते क्तांता क्रियाविशेषणं उरसो लोपश्च उरसा गच्छतीत्युरगः सुदुरोर
धिकरणे सुखेन गच्छतीति सुगः दुर्गः अन्यत्रापि दृश्यत इति वक्तव्यं ग्रामगः डे च विहायसो विहादेशो वक्त
व्यः विहगः आशिषि हनः शत्रुं वध्याद् शत्रुहः आशिषि किं शत्रुघातः दारावाहनोऽणन्त्यस्य च टः संज्ञायां दारुश
ब्दे उपपदे आङ् पूर्वाद्धंतेरण् स्यात् टकारांतादेशश्च वक्तव्य इत्यर्थः दार्वाघाटः चारौ वा चार्वाघाटः चार्वाघा
तः कर्मणि समि च कर्मण्युपपदे सं पूर्वाद्धंतेरुक्तं वेत्यर्थः वर्णान्संहंतीति वर्णसंघाटः वर्णसंघातः पदसं
घाटः पदसंघातः अपे क्लेशतमसोः अपपूर्वाद्धंतेः टः स्यात् अनाशीरर्थमिदं क्लेशापहः पुत्रः तमोपहः सूर्यः
कुमारशीर्षयोर्णिनिः कुमारघाती शिरसः शीर्षभावो निपात्यते शीर्षघाती लक्षणे जायापत्योष्टक् हं

टेटक् कस्मात् लक्षणवति कर्तरि जायाघ्नो ना पतिघ्नी स्त्री अमनुष्यकर्तृके च जायाघ्नस्तिलकालकः पतिघ्नी पाणि
रेखा पित्तघ्नं घृतं मनुष्येति किं आखुघातः शूद्रः अथ कं बलनडः शत्रुघ्न इति मूलविभुजादिवाधितं चोरघातो
नरघातो हस्तीति तु बाहुलकादपि शक्तौ हस्तिकपाटयोः ३ तेटक् कस्मात् शक्तो घात्यात्मा मनुष्यकर्तृकार्थमिदं ह
स्तिघ्नो ना कपाटघ्नश्चोरः कवाटेति पाठान्तरं पाणिघताडघौ शिल्पिनि ३ तेटक् टिलोपो घत्वं निपात्यते पाणिता
डघौ रूपपदद्वयोः शिल्पिनि किं पाणिघातः ताडघातः राजघ उपसंख्यानं राज्ञा नेहतिराजघः आढ्यसुभगस्थूल
पलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् एषु च्व्यर्थेष्वच्व्यन्तेषु कर्मसूपपदेषु कृञः ख्युन् स्यात् अना
ढ्यं आढ्यं कुर्वन्त्यनेन आढ्यंकरणं अच्वौ किं आढ्यीकुर्वन्त्यनेन इह प्रतिषेधसामर्थ्याल्ल्युडपीति काशिका ता
थ्यम तु ल्युट् स्यादेव अच्वाविस्फलत्वाद्र्ध्यं कर्तरि भुवः खिष्णुच्खुकञौ आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु भवतेरेतौ स्तः अ
नाढ्य आढ्यो भवति आढ्यंभविष्णुः आढ्यंभावुकः स्पृशोऽनुदके क्विन् घृतस्पृक् कर्मणीति निवृत्तं मन्त्रेण स्पृशतीति म
न्त्रस्पृक् ऋत्विग्दधृक् व्याख्यातं त्यदादिषु दृशोऽनालोचने कञ्च समानान्ययोश्चेति वाच्यं सदृक् सदृश् सदृशः अ
न्यादृक् अन्यादृशः क्सोऽपि वाच्यः तादृक्षः सदृक्षः अन्यादृक्षः सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुप
सर्गेऽपि क्विप् एभ्यः क्विप् स्यात् उपसर्गे सत्यसति च सुप्युपपदे शुसत् उपनिषत् अण्डसूः प्रसूः मित्रद्विट् प्रद्विट् मित्र
ध्रुक् गोधुक् प्रधुक् अश्वयुक् प्रयुक् वेदवित् निवित् इत्यादि अग्रग्रामाभ्यां नयतेर्णो वाच्यः अग्रणीः ग्रामणीः
भजो ण्विः सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात् अंशभाक् प्रभाक् अदोऽनन्ने विट् स्यात् आममत्ति आमात् सस्यात्
अनन्ने किं अन्नादः क्रव्ये च अदे विट् स्यात् पूर्वसूत्रेण सिद्धे वचनमण्बाधनार्थं क्रव्यात् आममांसभक्षकः कथं

ब×
"च्विख्युनि ते तु च्व्यन्तस्य न
व्ययत्वेऽव्यये रक्षस्य मुमा
गमः स्यादिति वा तत्ख्युन्
ल्युटौ समानार्थौ परन्तु
दुष्टिकरणे अयमधिक
रणे तस्मात् प्रतिषेधसाम
र्थ्यात् ल्युडपीति काशिका
कारस्य मते ७
×ती×

८

तर्हि क्रव्यादोऽस्रप आशर इति पक्वमांसभक्षे उपपदेऽण् उपपदस्य क्रव्यादेशः पृषोदरादित्वात् दुहः कब्घश्च कामदुघा
अन्येभ्योऽपि दृश्यते छंदसीति निवृत्तं मनिन् क्वनिप् वनिप् विच् एते प्रत्यया धातोः स्युः नेड्वशि कृति वशादेः कृत इण्न स्यात्
सुशर्मा प्रातरित्वा विड्वनोरनुनासिकस्यात् अनुनासिकस्यात्स्यात् विजायत इति विजावा उण् अपावा विच् रेट् रेट्
सुगण् क्विप् च अयमपि दृश्यते सत्सूद्विषेत्यस्यैव प्रपंचः उखास्रत् पर्णध्वत् वाहभ्रट् अंतः पदांतस्यानितेर्नस्य णत्वं
स्यात् उपसर्गस्थान्निमित्तात्परश्चेत् हे प्राण् शास इत्त्वं मित्राणि शास्ति मित्रशीः आशासः क्वौ उपधाया इत्वं वाच्यं आशीः
इत्वोत्वे गीः पूः छ्वोः शूडनुनासिके च क्विपूव एतुक्कादेर्ऽस्य वः स्यात् ततुक्तत् अनुनासिकस्य क्विझलोः क्ङिति दीर्घः मोनो धातोः प्रतान् प्रशान् ज्वरि
त्वर् अवमूः ज्वरत्वरेस्रट् जूः जूरौ जूरः स्रूः ऊः इति ऊनावतीति ऊनो ऊनावः मुवो मुवः सुम्नः सुम्नौ सुम्नः राल्लोपः धु
र्वी मूर्छा मुरौ मुरः धुर्वी धूः गमः क्वौ अनुनासिकस्य लोपः स्यात् अंगंगत् गमादीनामिति वक्तव्यं परीतत् संयत् सुनत् ऊङ् च
गमादीनामिति वक्तव्यं लोपश्च अग्रेगूः अग्रेभ्रूः स्वः कच बात् क्विप् शास्त्रः शास्ताः शासिधातोरित्वं बाधित्वं स्त्वं सुप्यजातौ
णिनिस्ताच्छील्ये अजातौ सुपि धातोर्णिनिः स्यात् ताच्छील्ये द्योत्ये उष्णभोजी शीतभोजी अजातौ किं ब्राह्मणानामंत्रयिता ता
च्छील्ये किं उष्णं भुंक्ते कदाचित् इह इति कारे लोपसर्गेतिन्नः एवं णिनिरिति व्याख्या उत्प्रतिभ्यामाङि सर्तेरुपसंख्या
नमिति पवितं स्तरदवमाधवादिनिश्चतदेवानुस्तेतद्यता व्यविरोधादपेक्षं प्रतिभ्रसोपसर्गेपि णिनिः सब्रह्मवोपडी वि
नां अनुपाद्विवर्गः प्रतत्यधो धामविसारि नवंवनीयाः प्रत्यवोनुडी विनिरित्यादि साधुकारिण्युपसंख्यानं ब्रह्मणि वदः
अताच्छील्यार्थं वार्तिकद्वयं साधुकारी ब्रह्मवादी कर्तर्युपमाने णिनिः स्यात् उपपदार्थः कर्त्ता प्रत्ययार्थस्य कर्तुरुपमा
नं उष्ट्र इव क्रोशति उष्ट्रक्रोशी ध्वांक्षरावी अत्राताच्छील्यार्थमिदं वचनं कर्तरि किं अपूपानिव भक्षयति माषान् उप

माने किं उष्ट्रः क्रोशति व्रते। णिनिः स्यात् स्थण्डिलशायी बहुलमाभीक्ष्ण्ये पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः स्यात् क्षी
रपायिण उशीनराः मनः सुपि मन्यतेर्णिनिः स्यात् दर्शनीयमानी आत्ममाने खश्च स्वकर्मके मनने वर्तमानान्मन्यतेः सु
पि खश् स्यात् चाण्णिनिः पण्डितमात्मानं मन्यते पण्डितंमन्यः पण्डितमानी खित्यनव्ययस्य कालिंमन्या अनव्ययस्य किं दि
वामन्या इच एकाचोऽम्प्रत्ययवच्च इकन्तादेकाचोऽम् स्यात् स च स्वाद्यम्वत् खिदन्ते परे श्रोतोम्मन्यो गांमन्यः वाम्मन्यः स्त्रियं
मन्यः स्त्रीमन्यः नरंमन्यः भुवंमन्यः श्रियमात्मानं मन्यते श्रियंमन्यं कुलं तास्य कारवचनात् श्रीशब्दस्य ... स्वः भ्रूमन्योऽस्ता
वश्च भूते अधिकारोऽयं वर्तमाने लडिति यावत् करणे यजः करणे उपपदे भूतार्थवृत्तेर्यजेर्णिनिः स्यात् कर्तरि सोमेने
ष्टवान् सोमयाजी अग्निष्टोमयाजी कर्मणि हनः पितृव्यघाती कर्मण्येत्येव ... ब्रह्मभ्रूणवृत्रेषु
क्विप् एषु कर्मसूपपदेषु हन्तेः भूते क्विप् स्यात् ब्रह्महा भ्रूणहा वृत्रहा क्विबेवेत्येव सिद्धे नियमार्थमिदं ब्रह्मादिष्वेव हन्तेरेव
भूते एव क्विबेवेवेति चतुर्विधोऽत्र नियम इति काशिका ब्रह्मादिष्वेव क्विबेवेवेति त्रिविधो नियम इति ... सुकर्मपाप
मन्त्रपुण्येषु कृञः सु कर्मादिषु कृञः क्विप् स्यात् त्रिविधो नियम इति काशिका सुकृत् पापकृत् मन्त्रकृत् पुण्यकृत्
क्विबेवेवेति नियमात् कर्मण्युपपदे ... एवेति नियमात् मन्त्रमधीतवान् मन्त्राध्यायः अत्र न क्विप् भूते एवेति नि ९
यमात् मन्त्रं करोति करिष्यति वेति विवक्षायां न क्विप् स्वादिष्वेवेति नियमात्तावादन्यस्मिन्नुपपदे क्विप् शास्त्रकृत्
तास्यकृत् सोमे सुञः सोमसुत् चतुर्विधोऽत्र नियम इति काशिका एवमुत्तरसूत्रेऽपि अग्नौ चेः अग्निचित् कर्मण्यग्न्याख्या
यां कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप् स्यात् अग्न्याधारस्थलविशेषस्याख्यायां श्येन इव चितः श्येनचित् क
र्मणीनि विक्रियः कर्मण्युपपदे विपूर्वात् क्रीणातेरिनिः स्यात् कुत्सितग्रहणं कर्तव्यं सोमविक्रयी घृतविक्रयी इत्यत्र

कनिप् कर्मणीत्येव पाठे दृष्ट्वान् पारदृश्वा राजनि युधि कृञः क्वनिप् स्यात् युधिरन्तर्भावितण्यर्थः राजानं
योधितवान् राजयुध्वा सहे च कर्मणीति निवृत्तं सहयुध्वा सहकृत्वा सप्तम्यां जनेर्डः सरसिजं मंदुरायां जातो मं
दुरजः ङ्यापोरिति ह्रस्वः पंचम्यामजातौ जातिवर्जिते पंचम्यन्ते उपपदे जनेर्डः स्यात् संस्कारजः अदृष्टजः उ
पसर्गे च संज्ञायां प्रजा स्यात् संततौ जने अनौ कर्मणि अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात् पुमांसमनुरुध्य जा
ता पुमनुजा अन्येष्वपि दृश्यते अन्येष्वप्युपपदेषु जनेर्डः स्यात् अजः द्विजः ब्राह्मणजः अपिशब्दात्सर्वोपाधिव्य
भिचारार्थः तेन धात्वंतरादपि कारकांतरेष्वपि क्वचित् परितः खाता परिखा क्तक्तवतू निष्ठा एतौ निष्ठासंज्ञौ स्तः
निष्ठा स्नातादौ धातोर्निष्ठा स्यात् तत्र तयोरेवेति भावकर्मणोः क्तः कर्तरि कृदिति कर्तरि क्तवतुः उकाविती स्नातं म
या स्तुतः स्तुया विष्णुः विष्णुर्विश्वं कृतवान् निष्ठायामण्यदर्थे ण्यदर्थो भावकर्मणी ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्या
त् क्षियो दीर्घात् दीर्घात्क्षियो निष्ठातस्य नः स्यात् क्षीणवान् भावकर्मणोस्तु क्षितः कामो मया शुकः क्षितः क्षि
तवान् स्तृतः स्तृतवान् कृतः ऋणोर्दिवाशब्दो वाच्यः तेन एकाच्त्वान्नेट् वृतः वृतः रदाभ्यां निष्ठातो नः पूर्वस्य च दः
रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात् निष्ठापेक्षा पूर्वस्य धातोर्दकारस्य च हिंसायां ऋ इत्व रपरः णत्वं शीर्णं ब
हिरंगत्वेन दृष्टेरसिद्धत्वान्नेह कृतस्यापत्यं कार्तिः भिन्नः छिन्नः संयोगादेरातो धातोर्यण्वतः निष्ठातस्य नः स्यात् द्राण
: ग्लानः म्लानः ल्वादिभ्यः एकविंशतेर्लूञादिभ्यः प्राग्वत् लूनः ज्यायदित्याजीनः ज्यो दीर्घश्च दुग्वोर्दूनः दुङुपता
पदस्य पठ्यते सानुबंधत्वात् ... तया दुत इति माधवः पूनः पूञो विनाशे पूना यवाः विनष्टा इत्यर्थः प्र
तमन्यत् सिनोतेर्ग्रासकर्मकर्तृकस्य सिनो ग्रासः ग्रासस्तु किं सिता पाशेन सूकरी कर्मकर्तृकेति किं सितो ग्रासो

बद्धापेक्षा यावद्बहिरंगत्वेन दृष्टेरेफस्यासिद्धत्वात् रदाभ्यां मित्यनेन नकारः परस्य तकारस्य नो न ४

देवदत्तेन ओदितश्च लुजो लुग्नः टुओश्वि उच्छूनः ओहाक् प्रहीणः स्वाद ओदित इत्युक्तं सूनः सूनवान् दूनः ओदिन्न ध्येङीङः प्याय

सामर्थ्यान्नेह उद्दीनः द्रवमूर्त्तिस्पर्शयोः श्यः द्रवस्य मूर्त्तौ काठिन्ये स्पर्शे चार्थे श्यैङः संप्रसारणं स्यान्निष्ठायां श्योऽस्पर्शे श्यैङा

निष्ठातस्य नः स्यात् अस्पर्शे इति दीर्घः शीनं घृतं अस्पर्शे किं शीतं जलं द्रवमूर्त्तिस्पर्शयोरिति किं संश्यानो वृश्चिकः शी

तात्संकुचित इत्यर्थः प्रतेश्च प्रतिपूर्वस्य श्यः संप्रसारणं स्यात् निष्ठायां प्रतिशीनः विभाषाभ्यवपूर्वस्य श्यः संप्रसारणं वा स्यात्

अभिश्यानं घृतं अभिशीनं अवश्यानो अवशीनो वृश्चिकः व्यवस्थितविभाषेयं तेनेह न समवश्यानः अञ्चोऽनपादाने अञ्चो निः

ष्ठातस्य नः स्यात् न त्वपादाने यस्य विभाषा यस्य क्वचिद्विहितस्ततो निष्ठाया इण्न स्यात् उदितो वेति क्त्वायां वेट्त्वादि

ह नेट् समक्नः अपादाने किं उदक्तमुदकं कूपात् नत्वस्यासिद्धत्वात् वृक्ण इति षत्वे प्राप्ते निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु

सिद्धो वाच्यः वृक्णः वृक्णवान् परिस्कन्दः प्राच्यभरतेषु पूर्वेण मूर्द्धन्ये प्राप्ते तदभावो निपात्यते परिस्कन्दः प्राच्येति किं परि

स्कन्दः परिस्कन्दः परेश्चेति विकल्पः स्तनेरिति षत्वे प्राप्ते प्रतिस्तब्धनिस्तब्धौ च अत्र षत्वं न स्यात् दिवोऽविजिगीषायां दिवो निष्ठा

तस्य नत्वं स्यादविजिगीषायां द्यूनः विजिगीषायां तु द्यूतं निर्वाणोऽवाते अवाते इति छेदः निःपूर्वाद्वातेर्निष्ठातस्य नत्वं स्यादवा

तश्चेत्कर्त्ता न निर्वाणोऽग्निर्मुनिर्वा वाते तु निर्वातो वातः शुषः कः निष्ठातस्य कः शुष्कः पचो वः पक्वः क्षायो मः क्षामः स्त्यः प्र

पूर्वस्य प्रस्त्यः संप्रसारणं स्यात् निष्ठायां प्रस्त्योऽन्यतरस्यां निष्ठातस्य मो वा स्यात् प्रस्तीमः प्रस्तीतः प्राक्किं स्त्यानः अनुपसर्गा

त्फुल्लक्षीबकृशोल्लाघाः ञिफला फुल्लः निष्ठातस्य लत्वं निपात्यते क्तवत्वेकदेशस्यापीदं निपातनमिष्यते फुल्लवान् क्षी

बादिषु क्तप्रत्ययस्यैव तलोपः तस्यासिद्धत्वात्तस्येटोऽभावश्च निपात्यते क्षीबो मत्तः कृशस्तनुः उल्लाघो नीरोगः अनु

पसर्गात्किं आदितश्च आकारान्तो निष्ठाया इण्न स्यात् ञिफला विशरणे फलेरत उत्स्यात्तादौ किति प्रफुल्लः प्रफुल्लितः प्रकृशि १०

[illegible]

[illegible]

तः प्रोल्लाघितः कथं तर्हि लोध्रद्रुमं सानुमतः प्रफुल्लमिति फुल्ल विकसने पचाद्यच् सूत्रे तु फुल्लतादिनिर्देशार्थं उत्फुल्लसं
फुल्लयोरुपसंख्यानं नुदविदोंदत्राघ्राह्रीभ्योन्यतरस्यां एभ्यो निष्ठातस्य नो वा नुन्नः नुत्तः विद विचारणे रौधादिक एव गृह्यते
उंदिना परेण साहचर्यात् विन्नः वित्तः वेत्तेस्तु विदितः विद्यते विन्नः उंदी श्वीदितो निष्ठायां प्रसक्तेरीदित्त्वान्निष्ठायामिण्न उन्न
ः उत्तः त्राणः त्रातः घ्राणः घ्रातः ह्रीणः ह्रीतः न ध्याख्यापृमूर्छिमदां एभ्यो निष्ठातस्य न त्वं ध्यातः ख्यातः पूर्तः राल्लोपः मू
र्तः मत्तः वित्तो भोगप्रत्यययोः विंदतेर्निष्ठांतस्य निपातोयं भोग्ये प्रतीतौ चार्थे वित्तं धनं वित्तः पुरुषः अनयोः किं विन्नः वित्त +ते
भागमदनेतिकसोवद्धादिहनेट् भित्तं शकलं भिन्नमन्यत् ऋणमाधमर्ण्ये ऋधातोः क्तेन कारस्य नत्वं निपात्यते अधम
र्णव्यवहारे ऋतमन्यत् स्फायः स्फी निष्ठायां स्फीतः इण्निष्ठायां निरः कुषो निष्ठायामिट् स्यात् वस्य विभाषेति निषेधे प्रा
प्ते पुनर्विधिः निष्कुषितः वसतिक्षुधोरिट् आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात् उषितः क्षुधितः अंचेः पूजायां क्त्वानि
ष्ठयोरिट् स्यात् अंचितः गतौ तु अक्तः लुभो विमोहने लुभः क्त्वानिष्ठयोरिट् न तु गार्द्ध्ये लुभितः गार्द्ध्ये तु लुब्धः क्लिशः क्त्वानि
ष्ठयोः इड्वा स्यात् क्लिश उपतापे नित्यं प्राप्ते क्लिशू विबाधने अस्य क्त्वायां विकल्पे सिद्धेपि निष्ठायां निषेधे प्राप्ते विकल्प
ः क्लिशितः क्लिष्टः पूङश्च पूङः क्त्वानिष्ठयोरिड्वा स्यात् पूङः क्त्वा च पूङः क्त्वानिष्ठयोर्वसेट्किन्न स्यात् पवितः पूतः क्त्वा
ग्रहणं क्त्वाग्रहणमुत्तरार्थं नोपादित्यत्र हि क्त्वैव संबध्यते निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः एभ्यः क्त्वानिष्ठा किन्न स्यात्
ग्रथितः ग्रथितवान् अनुबंधनिर्देशो यङ्लुग्निवृत्त्यर्थः क्ष्वेदितः क्ष्वेदितवान् आदिकर्मणि निष्ठा वक्तव्या आदि
कर्मणि क्तः कर्तरि च आदिकर्मणि यः क्तः स कर्तरि स्यात् चाद्भावकर्मणोः विभाषा भावादिकर्मणोः भावे आदिकर्म
णि च आदितो निष्ठायामिड्वा स्यात् प्रस्वेदितश्चैत्रः प्रस्वेदितं तेन ञिक्ष्विदेति स्वादिरत्र गृह्यते ञिक्ष्विदिः साहचर्यात् स्विद्य

तेस्कन्नस्विदित इत्येव ञिमिदा ञिक्ष्विदा त्वादी दिवादी च प्रमेदितः प्रमेदितवान् प्राक्ष्विदितः प्रक्ष्वेदितवान् प्रधर्षितः प्रध
र्षितवान् धर्षितं तेन सेट्त्वं परिक्लिन्नः क्लिन्नं तेनेत्यादि मृषस्तितिक्षायां सेट्त्वं हा किन्न स्यात् मर्षितो मर्षितवान् क्षमायां किं
अपमर्षितं वाक्यं अविस्पष्टमित्यर्थः उदुपधाद्भावादिकर्मणोरन्यतरस्यां उदुपधात्परान्नावादिकर्मणोः सेट्निष्ठा वा कि
त्स्यात् द्युतितान्द्योतितानु मुदितं मोदितं साधुना प्रद्युतितः प्रद्योतितः प्रमुदितः प्रमोदितः साधुः उदुपधात् किं विदितं
रावेत्यादि किं रुचितं कार्षापणं सेट्त्वं कुष्टं रात्रिकरणेन्यत्र वेष्यते नेट् गुध्यते गुधितं निष्ठायां सेटि णेर्लोपः स्यात् ना
वितो नावितवान् श्वीदितः इति नेट् संप्रसारणेऽशूनः दीनः शूनः ऊढं वन्तुं तन्तु वतः ततः पतेः सन्निवेद्धृवादि नसावे प्रा
प्तिदीप्ति इते निपातनात् इट् पतितः सेस्निवीति वेद्धृवा सिद्धे कृतस्या दीना मीदिश्वेन अनित्यवृद्धापनाद्धाते
न धावितमित्यादि रुक्षित इत्यादि तस्य विलाधित्यत्र एकाच इत्येव दरिद्रितः क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि
मन्थमनस्तमः सक्ताविस्पष्टस्वरानायासभृशेषु ७।२।१८ क्षुब्धादीन्यष्टौ अनिष्कानि निपात्यन्ते सम्बुद्धाक्रमेण मन्थादिष्वर्थेषु
इव द्रव्यसंसृष्टक्षाः सक्तवो मन्थः मन्थनदण्डस्य क्षुब्धः मन्थश्चेत् स्वान्तं मनः ध्वान्तं तमः लग्नं सक्तं निष्ठानत्वमपि निपातनात्
म्लिष्टमविस्पष्टं विरिब्धः स्वरः अवेरेव अनयोरुपधायाः इत्वमपि निपात्यते फाण्टं अनायाससाध्यः कषायविशेषः मा
